प· देसमतापिनी॥२६॥स्वामिपक्षोन्नतामित्रेगुणैःसर्वैर्विभूषिता॥मृकपुत्रांगविहीनास्यातस्तभगास्तसंवे
गिणी॥२७॥योरंध्रेरविनिंदिताचव्यसनीचतपस्विनी॥परप्रज्ञास्यवलीपापदृष्टाद्दुर्भगासदा॥मूलेकामंदी
० नसक्ताबुभुक्षाचप्रसुर्भवेत्॥प्रज्ञावतीकर्मसक्तागजगोगामिनीगुणैः॥पानीयभेदृष्टाचेत्ताविवा
दक्रूरकार्यकृत॥शीलसक्ताछिनपापाद्भुतकर्मसुशालिनी॥२०॥वैश्वेसतीपुण्यवतीगुणैर्गम्भीतिचांन
तिं॥उदारयुक्तास्वपतेनिर्वैराच्चबहुमज्ञा॥२१॥विद्दमधिस्थेबहुसुताधनधान्यासुभूषणा॥भतुराः
नांनंदनृत्यगीतवाद्यादिभिःसदा॥२२॥वासवर्क्षेवसधनभोगमान्यागुणैर्युता॥पतिस्निग्धापरद्र
तावरकर्मणिचोत्सुकं॥२३॥स्वातर्क्षेनृत्यगीतादिकलाभिज्ञाचमानिनी॥भाग्ययुक्तापतिकुलजन
मान्यासुतैर्युता॥गुणैर्हीनासैकपादेकर्कशापरुषान्विता॥दुर्भगाजनकावासानष्टकामासुरूपिणी॥२५॥

गुणैः मतैः सुखैः संपन्नभूषणैर्मानितान्ननैः ॥ आर्द्रे वृद्धे कला द्यास्यान्मान्ययंतीच सज्जनान ॥ दृढव्रता
धर्मवतीपुत्रसौख्यार्थसंयुता ॥ विख्यातगुणसंपंना पौष्णभे प्रथमार्तवे ॥ पौ हेमा विशीला दुःखास्या
त्यिलवेरापराजिता ॥ पतिपुत्रैर्विदूराच नीचरक्ताचकापटी ॥ मध्यफलं ॥ २८ ॥ अथ विष्कंभादिषु
दुष्टयोगफलं ॥ परिघस्य तु पूर्वार्धे व्यतीपाते च वैधृतौ ॥ संध्यासु पूर्वविष्ट्यामशुभं प्रथमार्तवं ॥
तथा ॥ आमासंक्रांतिविष्ट्यां च व्यतीपाते च वैधृतौ ॥ परिघस्य तु पूर्वार्धे पूर्वे गंडातिगंडयोः ॥ व्याघा
तेन वज्रस्ले तु नाड्यः पंचचतुर्दश ॥ वैधव्यमर्थहानिं च सुतनाशं मदद्भयं ॥ वैकुंठ्यंशत्रुरक्षिचदारिद्र्यं क्षीण
जीवनं ॥ तेषां दानिं समायाति सदा पुष्पवती क्रमादिति ॥ अथ राशिफलं ॥ मेषे सव्यभिचारी स्याद्वृषभे प
रभोगिनी ॥ मिथुने धनभोगाढ्या कर्कटे व्यभिचारिणी ॥ पुष्पाद्या सिंहराशौ तु कन्यायां श्रीमती तथा ॥ वि

प्र. चक्षणान्तु रमायां तु वृश्चिके तु पतिव्रता ॥ दुश्चारिणी धनुः पूर्वे चोत्तरार्धे पतिव्रता ॥ मकरे मानहीना च कुंभेन
र्धनबंधुता ॥ मीने विलक्षणा लग्नग्रहसंस्थाविवादवत ॥ अथ नारीनववस्त्रफलं ॥ कुभगाश्विते वस्त्रास्यान्न
२ दवस्त्रा पतिव्रता ॥ क्षौमवस्त्रा क्षितीशास्यान्नववस्त्रा मुनान्विता ॥ दुर्भगा जीर्णवस्त्रा स्याद्रोगिणी रक्तवास
सी ॥ नीलांबरधरा नारी विधवा पूर्णतां ततः ॥ मलिनांबरधरा नारी दरिद्रा स्याद्दुराखला ॥ वस्त्रे स्युर्विषमार
कबिंदवः पुत्रमाप्नुयात ॥ समाश्वेत कन्यका चेति फलं स्यात्प्रथमार्तवे ॥ संमार्जनीकाछन्नणादिश्चर्यान्न
स्नेदधाना कुलटा तदा स्यात ॥ नख्योपभोगेन परास्थिता चेद्दृष्टरजो भाग्यवती तदा स्यात ॥ निंदिता तिथि
वारर्क्षे मंगलं न कर्तव्यं ॥ तथा निंदिते तिथिवारर्क्षे नाचरेत्तत्र मंगलं ॥ तस्मात्सम्यग्विचार्यैव सतो मंगलमा
चरेदिति ॥ मंगलाचार उक्तः ॥ स्नानतल्पे । उदूढांगनायास्तु आर्तवे प्रथमतन ॥ अक्षतैरासनेक्लृप्तैस

दीपंवासयेन्नतः॥ अपूपंलवणंमुद्गंगुडमिश्रंतथादधि॥दद्याद्ब्राह्मणपत्नीभ्यस्ताभ्यांदद्याच्चभोजनमिति
॥ ॥अथसामान्यतोरजस्वलाधर्मः॥ तत्रधर्मदक्षः॥ आर्तवाभिप्लुतानारी नैकावेक्रमम् संविशेत॥ नसंसर्ग
मजेत्सद्भिःस्नातापापात्प्रमुच्यते॥ अंजनाभ्यंजनेस्नानंप्रवासंदंतधावनं॥नकुर्यात्सार्तवानारीग्रहाणामी
क्षणंतथा॥ ग्रहणमरणेचापिकर्माण्युत्सर्गकर्माणि॥ आर्ताविनष्णुपासनोरजोदोषोनविद्यते॥नखानां
छेदनंरज्जुतालपत्रादिबंधनं॥ दग्धंशरावेभुंजीतपेयंचांजलिनापिबेदिति॥ तथाचापस्तंबसूत्रव्याख्यायां॥
तस्मात्मलवद्वाससानसंवदेत॥नसहासीत।नास्याअन्नमद्यान्नापिभोगंकुर्यात॥यस्तांस्नायतेसप
तितोभवतिअरण्यंगच्छतेस्तेनः॥ पृष्ठतोगच्छतेअपगल्भोजायते॥ याम्लानितत्रजंगलउदकेम्रियतेसप
तितोभवतिआभ्यंजेदुश्चर्मा॥ याकेशान्प्रलिखते॥ नस्यांखलतिपरनारी। याङ्क्तेसस्येकाणः याददतोधाव

वेतनस्यैस्यावरेत॥ यानिखानानिरंतनेतस्यैकुलस्त्रीयाप्राणिहिंसयाक्लीवः यारत्नुंस्रजति। तज्ञानउद्बंध
·व· श्रियते। यापर्णेनभुंक्तेतस्याउन्मतः। ब्रह्मपात्रभोजनातन्दुखोभवतिजायते॥ एतद्दुर्जायिलातिस्त्रोराबी
०२ व्रतंचरेदंजलिनावापिबेदखर्वेणवापात्रेण प्रजायेगोपायेति। दिवास्वापमलंकारंक्रीडांनिल्यात्रि
यांतथा॥ गृहकर्मचतांबूलमध्वानंरात्रिभोजनं॥ ज्योतिषादर्शनंस्पर्शंपरपुंसश्चदर्शनं॥ हसनंगायनं
नत्येववर्जयेच्चप्रजार्थिनी॥ चतुर्थदिवसेस्नानात्परंपश्येत्पतिंरविं॥ इतिरजस्वलाधर्मः॥ अथसमयनि
र्णयः॥ रजस्वलायदानारीत्रिराचमस्तुचिर्भवेत॥ प्रथमेहनिचांडाली द्वितीयेब्रह्मघातिनी॥ तृतीये
जका प्रोक्ता शूद्रास्यात्तुचतुर्थके॥ भर्तुः शुध्याचतुर्थेह्नि स्नातानारीरजस्वला॥ दैवेकर्मणिपित्र्ये चपं ३
चमेहनिशुध्यतीति। षोडशादिनमध्येयदिपुनःपुष्पितास्यात्तदाविशेषः। रजस्वलायदानारीपु

नरेचरजस्वला॥ आषोडशाद्दिनात्प्राग्वापि त्रिरात्रमिति निश्चयः। त्रयोदशाद्दिनादूर्ध्वं रजोदृष्टं तृतीय
दा॥ अष्टादशाद्दिनात्प्राग्वापि युवत्यां स्यात्त्रिरात्रकं। एकादशे तथैकाहं द्विरात्रं द्वादशेऽहनि॥ ऊर्ध्वं त्रिरा
त्रं विज्ञेयमिति साधारणस्मृतं॥ अथ शुद्धिप्रकारमाह स्मृत्यर्थसारे॥ रजस्वला षष्टिमृत्तिकाभिः शौ
चं कृत्वा नखच्छेदादि स्त्रीपादन्यूनाभिर्मृत्तिकाभिः। विधवा द्विगुणमृत्तिकाभिः शौचं कृत्वा मलमपक्षाल्य
दंतधावनपूर्वकं चतुर्थेऽह्नि त्रिमुहूर्तानंतरं संगमे समये स्नायात्॥ आतुरायास्तु मत्याः शुद्धिप्रकार
उक्तः संग्रहे॥ आतुरा चेदृतुमती तस्याः स्नानं कथं भवेत्। स्पृष्ट्वा तु तां परा स्नायाद्दशकृत्वोऽप्यनातुरा। वासो
दशभिरेचैव परिधाय यथाक्रमं॥ ब्राह्मणान्भोजयित्वाथ पुण्याहेन विशुध्यति॥ आतुराणां च सर्वासामेवं
शुद्धिर्विधीयते॥ चित्रानुराधाश्रुतिहस्तिकार्द्राम चाश्विमूलाम्बुगरोहिणीषु॥ स्नायात्प्रसूताय दितेषु भ

शुस्रुतः प्रसूतिंच पुनः प्रलेभे ॥ अंतर्धिष्ण्यंच तुर्थकाले नलपातिभ तामातभान मत्र यः
स्यात्साधं लेवं क्रमेण प्रथमत्तु फलं त्रेयमंत्र मर्वरिः ॥ अंतर्धि हम्यप्रजायावा द्विरपिकु
ल यश्रीमती चेटिकास्या सर्वोलान हपुत्राव द्रुसंखसाद्दिता नर्थ नान्यखिवाद्दे ॥ लग्न
विवादो हनबल ॥ ॥ इति शुद्धिविधिः ॥ अथ प्रसंगात्तच्छांतिकर्मचोच्यते ॥ अत्र र
जोदर्शनकाले तिथिवारनक्षत्रयोगादौ दुष्टे शांतिकर्म कर्तव्यं ॥ तदुक्तं नारदीये ॥
आर्तवानां तु नारीणां शांतिं वक्ष्यामि तच्छृणु ॥ तिथिवारर्क्षयोगेभ्यो लग्नसग्रहसमन्मान ॥ ग्रहेभ्यो दुष्टि
तेभ्यश्च तत्र दाणनिरूतये ॥ अत्र पुत्रादिलाभाय दंपत्यारभिरुद्धये ॥ पंचमे द्विनिषष्ठे वा युग्मेन्यदिवसे १
अथवा ॥ षोडशादिनपर्यंतं त्तु कालः प्रचक्षते ॥ तस्मिन्काले दानिनक्षेवाग्रहातिथ्य पुरःसरं ॥ ऋतुशांति

विरध्यात्तुहोमं चैवविधानतः॥ आचार्यं वरयेत्प्राज्ञं भुवनेश्वरनुष्ठितं॥ होमार्थं च जपार्थं च वरयेदृत्वि
जो वहून॥ यजमानाद्विजैः सार्धं शांतिहोमं समाचरेत॥ अग्न्यादीशानदिग्भागे देवतापूजनाय च॥ द्रो
णप्रमाणधान्येन व्रीहिराशित्रयं भवेत॥ कुंभत्रयं न्यसेत्तत्र तंतुवस्त्रादिवेष्टितं॥ पूरयेत्तीर्थसलिलैः प्र
ति कुंभं पृथक्पृथक॥ तद्दक्षिणे ष्टवाक्यानां जपार्थं कलशं न्यसेत॥ तद्दक्षिणे पुनः कुंभं सौरमंत्रजपा
य च॥ तद्दक्षिणे पावमानं जपार्थं कलशं सुधीः॥ उत्तरे रुद्रकलशं न्यस्य मंत्रान् जपेद्द्विय॥ सहस्रच्छिद्रक
लशं स्नानार्थं छिद्रमथापिवा॥ अग्न्यादीशानदिग्भागे वारुणं कलशं न्यसेत॥ एवं च नव कुंभांश्च व्रीहिराशि
षु निक्षिपेत॥ वस्त्रादिवेष्टितान् कुर्यात्पल्लवत्वक्फलादिः क्षिपेत॥ हेमरत्नादिसहितान् सपिधानफलाक्ष
तान॥ सूक्तेनाथ नवर्चेन प्रत्यर्च्य परस्परमथ॥ आपोहिष्ठादिभिश्चैव गायत्रीहंसमंत्रकैः॥ कुंभेषु च

प्र· क्षिपेद्धान्येमौषधानिचहेमंच॥ततश्चपंचरत्नानिगंधपुष्पाक्षतादिकान्॥औषधानिचवक्ष्यंतेमुनि
भिःशांतिकारणात्॥औदुंबरकुशादूर्वाराजीवंचंपाबिल्वकः॥विष्णुक्रांताथतुलसीयादृपंशंखपुष्पि
०४ का॥ज्ञातावर्यश्चगंधाचानिगुंडासर्षपद्वयं॥अपामार्गःपलाशश्चपनसोज्ञारकंतथा॥प्रियंगवश्च
गोधूमाव्रीहयश्चयवएवच॥क्षीरंचदधिसर्पिश्चपद्मपत्रंतथोत्पलं॥कुरंटकत्रयंगुंजावचाभद्रकमु
स्तकाउति॥द्वात्रिंशदौषधानीहयथासंभवमाहरेत्॥गजाश्वरथ्यावल्मीकसंगमाध्रदगोकुलात्॥रा
जद्वारप्रदेशाच्चमृदअष्टौविनिक्षिपेत्॥स्थाप्यान्निग्रोतिकलशानतन्मंत्रैःप्रपूजयेत॥यान्ञानांऔ
षधयास्योपधीश्चाविनिक्षिपेत्॥स्योनापृथ्वीतिमृदाश्चयेचौपत्तुवास्त्वचः॥सहिरत्नानीतिरत्नान्य
थगव्यानिपंचच॥वटाश्चसोदुंबराम्रप्लक्षाणांपत्तुयास्त्वचः॥मणिमुक्ताप्रवालानिगारुडंपुष्परागकं॥

वज्रेंद्रनीलगोमेदवैडूर्यमणयोनव ॥ सुवर्णराजतंमुक्ताराजावर्तंप्रवालकं ॥ पंचैतान्यथवैकंवामाणि
क्यमुतकांचनं ॥ अन्यद्रुद्रगणं तोद्रष्टव्यं ॥ कुंभोपरिन्यसेत्पात्रंकांस्यंवाताम्रमेवच ॥ वस्त्रद्वयेनसंवेष्ट्य
प्रतिमांभुवनेश्वरीम ॥ हैमीन्यसेत्तत्रतत्रइंद्राणींचपुरंदरं ॥ निष्कमात्रेणतदर्धेनपादेनाथस्वशक्तितः
प्रतिमास्तत्रकुर्वीतवित्तशाठ्यविवर्जितः ॥ आचार्यःपूजयेद्देवीमंगान्यावरणानिच ॥ उपचारैःषोड
शभिर्गायत्र्यामंत्रसारया ॥ इंद्राणींचाधिदेवींचइंद्राणीमासुनारिषु ॥ अथोत्तरप्रत्यधिदेवामिंद्रंवा
विश्वतस्परि ॥ अनेनविधिनाचार्यःपूजयेद्देवतात्रयं ॥ आवाहनादिसकलैरुपचारैःपृथक्पृथक् ॥ म
ध्यमंसंस्थितंकुंभंमंत्रेण भुवनेश्वरी ॥ प्रधानकर्मप्रवाक्येश्वजपःपूर्वोत्तरैःसह ॥ श्रीसूक्तंचजपित्वाच
आचार्योहोममाचरेत ॥ ततस्तुपूर्णकूलस्नानस्थापितांअयथाविधिः ॥ संस्थितंचोत्तरंकुंभंश्रीरुद्रद

व· संख्यया॥ चत्वारि रुद्रसूक्तानि चतुर्मंत्रोत्तराणि च॥ ईशानं द्राग्निसूक्तं च रौद्रान्न्यासान्न्यसेत्तथा॥ स्थाप्येद्द
क्षिणं कुंभं त्रातिगेकोत्तपंचदा॥ पूर्वोत्तरे रक्ष्यवाक्यैः सद्रुतत्रप्रधानकं॥ तद्दक्षिणे सौरंजपं तद्दक्षे पावमा
५ नकं॥ कुंभानां पश्चिमे देशे शांतिहोमं समाचरेत्॥ अन्वाधानं विधायाथ सूत्रोक्तं तं समाचरेत्॥ पूर्णपा
त्रनिधानादि कृत्वाचार्यो द्विजैः सह॥ दूर्वाभिः स्तिलगोधूमैः पायसेन घृतेन च॥ पायसं श्रपयेत्तत्र सा
वित्रं चरुद्वयं चरेत्॥ इध्माधानमुखांते च होमं कुर्याद्यथाविधि॥ तिस्रभिश्चैव दूर्वाभिरेकैकाचाहुतिर्भ
वेत्॥ अष्टोत्तरसहस्रं वा अष्टोत्तरशतं तु च॥ तिलमिश्रैस्तु गोधूमैः साज्यैः सर्वं हि होमयेत्॥ जुहुयात्पा २
यसेनैव आज्येन चरुणेत् क्रमात्॥ हविश्चतुष्टयेनैव प्रत्येकं समसंख्यया॥ गायत्र्यैव तु होतव्यं हविरेवच
तुष्टयं॥ ग्रहाणां पूजनं चैव वारणं केसरं जपेत्॥ तेभ्योप्याहुतयो देया लोकपालादिभिः सह॥ ततः

स्विष्टकृतं हुत्वा रक्षोपहरणादिकं॥ जयादिहोमं कृत्वा च प्रायश्चित्ताहुतीस्तथा॥ अनाज्ञातादिभिर्हुत्वा पूर्णा
हुतिमथाचरेत्॥ द्वादशाग्रदृणाज्येन सवस्त्रसफलेन च॥ सप्तते अग्नएतेन पूर्णादर्विति मंत्रतः॥ अग्नो
विश्वाति मंत्रेण समुद्रादूर्मिसूक्ततः॥ संततामाज्यधारां तां हुत्वा पूर्णाहुतिं क्रमात्॥ उत्तरं परिचर्यार्थं प्र
णीपात्रविसर्जनं॥ ब्रह्मणे च वरं दत्वा बलिदानादिकर्मापि॥ सद्दोपाधिष्ठितैस्तत्र प्रातिकुंभस्थितोदकैः॥
ऋतुमत्याः स्त्रियाः शांत्यै दंपतिभ्यां सुखाय च॥ अभिषिंचेत्तयोर्मूर्ध्नि वक्ष्यमाणैश्च मंत्रकैः॥ आ
पोहिष्ठेति नवभिः सूक्तेनाथ ततः परं॥ इंद्रा अंगन्नचेनैव पावमानैः क्रमेण तु॥ उभयं शृणवच्चेति स्वस्ति
दाविशस्पकृया॥ त्रियंबकेन मंत्रेण जातवेदस ऋचया॥ हंसः शुचिषदिति च ब्रह्मजज्ञान मित्यृचा॥ सह
स्रशीर्षा मंत्रेण तच्चंयोमंत्रकेण च॥ समुद्रज्येष्ठा इत्यादि चतुर्भिश्च प्रसिद्धकैः॥ आयंतामिति मंत्रैश्चात्र

प भिश्चैव यथाक्रमं ॥ इमा आपः शिवेनेति देवस्य त्वेति मंत्रतः ॥ मंत्रेणाथ तमीशानं त्वमग्ने रुद्र इत्यथ ॥ तमु
ष्टुहीति मंत्रेण भुवस्यापि परं तथा ॥ या ते रुद्रेति मंत्रेण शिवसंकल्पमंत्रतः ॥ इंद्रत्वा वृषभं पंच मंत्रैश्चैवाभिषे
१०६ चयेत ॥ तच्छंयोरभिषेकं च मंत्रैः पौराणिकैः शुभैः ॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः ॥ वासुदेवो
जगन्नाथस्तथा संकर्षणो विभुः ॥ प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते ॥ आखंडलोऽग्निर्भगवान्य
मो वै निर्ऋतिस्तथा ॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ॥ ब्रह्मणा सहिताः शेषा दिक्पालाः पांतु
ते सदा ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ॥ बुद्धिर्लज्जा वपुः शांतिस्तुष्टिः कांतिश्च मातरः ॥
एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः ॥ आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ॥ ग्रहास्त्वा
मभिषिंचंतु राहुकेतुश्च तर्पिताः ॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः ॥ ऋषयो मनवो गावो देवमातर

एवच ॥ देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः। अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि च ॥ औ
षधानि च रत्नानि कालस्यावयवाश्च ये ॥ सरितः सागराः शैलाः स्तीर्थानि जलदा नदाः॥ एतास्त्वामभि
षिंचंतु सर्वकामार्थसिद्धये ॥ कलशानां तु दकानि शातच्छिद्रघटेन येत ॥ धृत्वा शिरसि तं कुंभं स्नातस्य
याद्द्विजोत्तमैः॥ वस्त्रांतराणि धृत्वा च पुनश्चोपवसेत्सती॥ उपवासोत्र समीपस्थानं॥ भूपतौ गंध
माल्याद्यैः कुर्याद्राज्यविलोकनं ॥ सकांचनं कांस्यपात्रे घृतं संपूर्य बुद्धिमान॥ यालक्ष्मीरिति मंत्रेण र
पं रूपमनेन च ॥ दद्याद्विना यद्धात दक्षिणां च यथाविधिः॥ यालक्ष्मीर्यच्च मे दौस्थ्यं सर्वांगेषु प्रतिष्ठि
तं॥ तत्सर्वं शामयात्याशु श्रियमायुश्च वर्धयेति॥ ॐ रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय
इंद्रो मायाभिः पुररूप ईयते युक्ता ह्यस्य हरयः शता दश॥ दंपतीभ्यां पूर्वं धृत वासांस्याचार्याय
दद्यात्।

प्र· विप्रानभ्यर्च्यविधिवद्गंधपुष्पाक्षतादिभिः। धेनुंपयस्विनींदद्यादाचार्यायविभूषणैः। सवत्सांप्रतिमां
७ दद्यादाचार्यायसदक्षिणां। सदक्षिणमनड्वाहंप्रदद्याद्धज्ञापिने॥ ऋत्विग्भ्यश्चाथसर्वेभ्योदद्याद्द
क्षिणांततः। शंनोवातमहाशांतिपठेदाशीःततःपरं॥ भद्रासनेपविष्टोतुपुनःपुण्याहवाचनं॥ ग
णेशवरुणावर्च्यकृत्वानांदीमुखंततः। धर्मपत्नींस्पर्शयित्वाविष्णुर्योनीतिमंत्रकैः। समर्थयांतमभि
मंत्र्यतंडुलानक्षतांतदा॥ दद्याच्चसफलानधीमानपत्न्यैभस्वार्थमादरात॥ याःफाल्गुनीरित्यनयात्वाग्नि
स्तुविस्तवत्तमं। पुत्रांश्चजनयेत्स्पश्चाद। एतद्यमुनिभाषितं। अथषोडशादिनान्याद्याज्ञवल्क्यः। षोडश
र्तुर्निशाःस्त्रीणांतासुयुग्मासुसंविशेत॥ ब्रह्मचार्येवपूर्वाद्याश्चतस्रःश्चवर्जयेत॥ एवंगच्छन्स्त्रियं
क्षामामघांमूलंचवर्जयेत॥ सुस्थइंदौसकृत्पुत्रंलक्षण्यं ण्या जनयेत्पुमान। ऋतोगच्छेद्यथाकामंनियमः।

दृष्टादिनाद्यदि न गच्छेत्तदा दोषोपि विश्रूयते ॥ त्रीणि वर्षाण्यृतुमतीं भार्यां चेन्नोपगच्छति । स तुल्यं भ्रूण
हत्यायाः दोषमृच्छत्यसंशयं ॥ तत्र प्रायश्चित्तमपि । ऋतुस्नातां न गच्छेद्यो नियतां ब्रह्मचारिणीं ॥ निय
मातिक्रमात्तस्य प्राणायामत्रयं स्मृतमिति ॥ एवं प्रभूतदोषपरिहाराय शांतिं कृत्वा शास्त्रोक्ततिथ्यादि
षु गच्छेत् । पुनः रजोदर्शनपर्यंतं गमनं चरेत् ॥ तदाह वसिष्ठः । प्रभूतदोषं यदि दृश्यते तत्स्वल्पं ततः शां
तिककर्म कार्यं विसर्जयेद्देवतथैव शास्त्रात् ध्यायाच्च रजोदर्शनमिष्टसंगे ॥ ॥ इति रजस्वलाशांतिः । एवं यः कु
रुते शांतिं वसिष्ठाद्युक्तमार्गतः । तदनिष्टं तु सकलं मघ एव विनश्यति ॥ ॥ अथ गर्भाधानप्रयोगः ॥
ऋतुस्नातायां भार्यायां शुभे दिने दंपती मंगलस्नातौ भूत्वा भद्रासने ह्युपविश्य पत्नीं दक्षिणतः उपवे
श्य स्वस्तिवाचनं विधाय । प्राणानायम्याद्येत्यादि तिथ्याद्युच्चारणांते मम अस्यां पत्न्याः प्रथमरजोदर्शने ।

प्र· अस्यां गर्भाधानाख्यं कर्म करिष्ये ॥ तदंगत्वेनाभ्युदयिकं विधाय पत्नीमन्वारब्धः स मंत्रान्पठेत ॥ ॐ
विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ॥ आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते । गर्भं धेहि
०९ सिनीवालि गर्भं धेहि सरस्वति ॥ गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजा ॥ हिरण्ययी अरणी यन्नि
र्मंथतो अश्विना ॥ तं ते गर्भं हवामहे दशमे मासि सूतवे ॥ यथेयं पृथिवी मह्युत्ताना गर्भमादधे ।
एवं तं गर्भमाधेहि दशमे मासि सूतवे । यथा पृथिव्यग्निगर्भा द्यौर्यथेंद्रेण गर्भिणी ॥ वायुर्यथा दि
शां गर्भ एवं गर्भं दधातु ते । विष्णोः श्रेष्ठेन रूपेणास्यां नार्यां गवीन्यां ॥ पुमांसं गर्भमाधेहि दशमे १·
मासि सूतवे ॥ नेजमेष परापत सुपुत्रः पुनरापत ॥ अस्यै मे पुत्रकामायै गर्भमाधेहि यः पुमान् । व्य
स्य योनिं प्रति रेतो गृहाण पुमान्पुत्रो धीयतां गर्भो अंतः । तं माता दश मासो बिभर्ति स जायतां वीर

नमस्वानां॥ आतेगर्भोयोनिमेतु पुमान् बाणइवेषुधि॥ आवीरोजायतांपुत्रः स्तेदशमास्यः॥ करोमि
तेप्राजापत्यमागर्भोयोनिमेतुन॥ आनूनःपूर्णोजायतामश्लोणोपिचेन्नाधी॥न। पुमांस्ते पुत्रोना
रितंपुमाननुजायतां॥ यानिभद्राणिबीजान्यृषभाजनयंतुनो॥ तानिभद्राणिबीजान्यृषभाजनयं
तिनः। तैःस्त्वंपुत्रान्विंदस्वसाप्रसूर्धेनुकाभव॥ कामःसमृध्यतांमह्यमपराजितमेवमे॥ यंकामंका
मयेदेवतंमेवायोसमर्धय॥ इत्येतैर्मंत्रैःपत्नीमभिमंत्र्य॥ याःफलिनीर्याअफलाअपुष्पाया
श्चपुष्पिणीः। बृहस्पतिप्रसूतास्तानोमुंचंत्वंहसः॥ अग्निरस्तुविश्ववत्समंतुविभ्रस्राणमुत्तमं। अ
नूर्तश्रावयस्पतिंपुत्रंददातुदाशुषे॥ इतितंदुलान्पंचपुगीफलानिचपत्न्येदद्यात्॥ साक्षीरमध्येपा
यसंहृत्वाभुंजीयात्॥ तांबूलेनसाकंफलानिचभक्षयेत्॥ ततोनांदीमुखंकृत्वाद्विजान्भोजयेत्॥

·प्र· तथा। संस्कारकस्तु सर्वत्रापि श्रेष्ठस्तरतः सदा॥ संस्कार्यः पुरुषो वापि स्त्री वा दक्षिणतः सदेति॥ अज्ञा
०९ तनष्ठीपुरुषोत्तमायं श्रीविश्वनाथश्रुतिकर्ममान्यः। विश्वप्रकाशाभिधपद्धतौ तेनत्कृतारतोन्नाति
निषेकः कार्यः॥ ॥इति गर्भाधानं॥ अथ पुंसवनं॥ व्यक्ते गर्भे तृतीये मासि शुभे दिने शुभलग्ने पुंन
क्षत्रे चतुर्थे षष्ठाष्टममासे सीमंतेन सह वापि वा पुंसवनं कृत्वा सीमंतं कुर्यात्॥ तथा॥ व्यक्ते गर्भे द्विजाती
नां कुर्यात्पुंसवनं क्रियां॥ तस्मिन्दिने शुभे लग्ने सीमंतेन सहापि वा॥ कृत्वा पुंसवनं पश्चात्सीमंतस्तत्र च
क्रमात्॥ तृतीयस्तस्य मुख्योस्य षष्ठाष्टमचतुर्थकः॥ अथ दंपतीकाले मंगलस्नातौ भूत्वा पुंसवनात्
प्राक् तृतीयेऽह्नि वा से पुण्याहवाचनमंडपप्रतिष्ठापनांकुरार्पणप्रोक्षणप्रतिसरमातृकापूजनेद्धावाचना
नि कृत्वाद्धितीये नांदीमुखब्राह्मणभोजनं च कृत्वा तृतीये औपासनं कृत्वा पत्नीं दक्षिणतउपवेश्य

ताकृधर्मपत्न्याः प्रथमगर्भसंस्कारद्वारा सर्वगर्भसंस्कारार्थं पुंसवनाख्यं कर्म करिष्ये॥ यथोक्तं कुंडं कृत्वं
कृत्वोपासनाग्निं प्रतिष्ठाप्य॥ पारस्तीर्य द्रव्याज्यस्थाल्यावीतिषट्पात्राणि प्रयुज्य फलसहितवटश्रृंगान्
दृषत्सकृतो नूतनवस्त्रं च सकृत् प्रयुंज्यात्॥ प्रोक्षणाद्याज्यभागांतं कृत्वा सकृत्दला। धाता ददातु नो रयिमीशा
नो जगतस्पतिः। स नः पूर्णेन यावनत् स्वाहा॥ धात्रे। धाता प्रजाया उत राय ईशे धातेदं विश्वं भुवनं जजान॥ धा
ता पुत्रं यजमानाय दाता तस्मा उ हव्यं घृतवद्विधेम स्वाहा॥२॥ धाता ददातु नो रयिं प्राचीं जीवातुमक्षितां॥
वयं देवस्य धीमहि सुमतिं सत्यराधसः॥ स्वाहा॥३॥ धाता ददातु दाशुषे वसूनि प्रजाकामाय मीढुषे दुरो
णे॥ तस्मै देवा अमृताः संव्ययंतां विश्वे देवासो अदितिः सजोषाः॥ स्वाहा॥४॥ यस्त्वा हृदा॰ जातमस्याः॰ स्वा
हा॥५॥ अग्नये जातवेदसे। यस्मै त्वं सु॰ स्वस्ति स्वाहा॥ अग्नये जातवेदसे॥६॥ त्वेकपुत्रञावसीरत्रन्कामकातयः

प्र० नत्वामिन्द्रातिरिच्यते स्वा० इंद्रायेदं० ॥७॥ उक्थउक्थे सोम इंद्रं ममाद नीथे नीथे मघवानं सुतासः । यदीं
१० सबाधः पितरं न पुत्राः समानदक्षा अवसे हवंते स्वाहा । इन्द्राय पुत्रिणे० ॥८॥ सामित्सूक्त हनेद्भुत्वाज्ज
याज्ञेनातादि परिधिप्रहरणसंस्रावं हुत्वा सदसील्या द्वित्व स्वविसर्जनांतं प्रपरिणीतया कुमार्या दृषत्स्कृताभ्यां
वटशुंगान्येषयित्वा वस्त्रेण परिपूताव्यापरेणाग्निं प्राचीमुत्तानां निपात्यांगुष्ठतर्जनीभ्यां पुंसवनमसीति
यजुषा दक्षिणे नासिकाच्छिद्रे रसं निनयति सा तमाग भार्गिहरति । ततः आशिषो वाचयेत ॥ अजी
जनश्री पुरुषोत्तमोयं श्रीविश्वेश्वनाथं श्रुति कर्ममान्यः ॥ विश्वप्रकाशाभिधपद्धतौ तत्कृताय भू
पुंसवनं च कर्म ॥ ॥ इति पुंसवनं ॥ अथ सीमंतः ॥ गर्भाधानाच्चतुर्थे षष्ठेष्टमे वा मासि सीमंतोन्नयनं
कुर्यात ॥ अथ दंपती मंगलस्नातौ भूत्वा सीमंतात्प्राक्तृतीये दिवसे पुण्याहवाचनं नांदीश्राद्धं च नांतं पुं ८

सवनवत्कृत्वा द्वितीयेनांदीमुखसंकल्पं कृत्वा ततीये ब्राह्मणान्भोजयित्वाशिषो वाचयित्वा पत्नीं दक्षि
णत उपवेश्य प्राणानायम्याद्येत्यादि मम धर्मपत्न्याः प्रथमगर्भसंस्कारद्वारा सर्वगर्भसंस्कारार्थं
सीमंतोन्नयनकर्म करिष्य इति संकल्प्य पूर्ववदौपासनाग्निं प्रतिष्ठाप्यौपासनं विधायाग्निं परिसमूह्यालंकृ
त्य दर्व्याज्यस्थाल्यौ प्रोक्षणपूर्णपात्रं इध्मस्रुवाविति प्रयुज्याधिरूढयवमालां शलालीमौदुंबरत्र्येणीं दर्भ
पुंजीलांश्च प्रयुज्याद्याज्यभागांते धाराख्यायां पुंसवनोक्तक्रमेण ॥ धाता ददातु नो रयिमीशानः ॥१॥ धा
ता प्रजाया ॥२॥ धाता ददातु नो रयिं प्राचीं ॥३॥ धाता ददातु दाशुषे वसूनि ॥४॥ इति चतसृभिः। यस्त्वा हृ
दा कीरिणा ॥१॥ यस्मै त्वं सुकृते ॥२॥ त्वे सुपुत्र शवसः ॥३॥ उक्थ उक्थे ॥४॥ इति चतसृभिः स्रुवाद्या चा
ज्याहुतीर्हुत्वा० समिदन्नदहनं हुत्वा जयादि ब्रह्मविसर्जनांते परेणाग्निं पत्नीं प्राचीमुपवेश्य त्र्येण्या श

प्र· त्संपाताभिर्दर्भपिंजूलैः त्र्यलाकुत्पसेनच भूर्भुवः स्वरो राकामहं सुहवां सुष्टुती हुवे शृणोतु नः सु
भगा बोधतु त्मना॥ सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यं॥ यास्ते राके सुमतयः
२२ सुपेशसो याभिर्ददासि दाशुषे वसूनि॥ ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा॥ इति द्वा
भ्यां पत्न्या नासिकामारभ्य सीमंतपर्यंतमूर्ध्वमुन्नीय पश्चाद्गुरुज्य॥ गायतामित्यवीणागाथिनौ संशा
स्ति॥ तौ गायतः॥ योगंधरिरेव नो राजेति गत्वी रवाद्दिषुः॥ विवृत्तचक्रा आसीना स्तीरेण यमुने तव॥ इति
गात्वा नो॥ इतरान्त्वन्यैषां ब्राह्मणानां सोम एव नो राजेत्याद्युर्ब्राह्मणाः प्रजाः॥ विवृत्तचक्रा आसीना
स्तीरेण आसा विततसमीप नदीनामनिर्देशः यथा तीरेण गंगे तवेति॥ अथ पत्नीकंठे विरूढयवमालां नि २
धाय वाचंयच्छति आ नक्षत्रोदयात् उदितेषु नक्षत्रेषु प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य वत्समन्वारभ्य भू

भुर्वः स्वरितिद्विपलावाचं विसर्जतः ततोद्विजान्वाचयित्वा ब्राह्मणान्भोजयेत्॥ गर्भस्रोषणपरिहारार्थं
नवेन शरावेणानुस्रोतोजलमाहरेत्॥ नीयंतीमपिश्रोष्यंतीं पादयोर्मूर्ध्नि चाक्षिपेत्॥ ऐतु गर्भो दितिस
भिर्द्विजान्वाचयेत्तथा॥ ॐ ऐतु गर्भो अक्षितो जीवो जीवंत्याः। आयमनीयमयत गर्भमापो देवीः सरस्व
तीः। ऐतु गर्भो अक्षितो जीवो जीवंत्याः॥ तिलदेव पद्यस्व न मांसमसि नोदनं॥ स्थविम्यव पद्यस्व न मांसमसि
पुनस्त्वावसुनबद्धं मासि मज्जसु॥ निरेतु पृश्नि शेवलं शुने जराय्वत्तवे॥ ॥ इति विश्वप्रकाशे सीमंतोन्नयनवि
धिः॥ अथ विष्णुबलिः॥ सोऽष्टममासे सपूर्वपक्षे सीमंतानंतरं अष्टम्यां नवम्यां द्वादश्यां श्रवणनक्षत्रे कर्तव्यः
तद्यथा॥ प्राणानायम्य देशकालादि उक्त्वा अस्याः धर्मपत्न्याः कुशलपूर्वकं गर्भरक्षार्थं सर्वेषां च कुशलार्थं वि
ष्णुबलिकर्म करिष्ये पठित्वा नूतनवस्त्रोपरि तंडुलैर्द्वादशारं प्रतिष्ठाप्य तन्नालिकेरस्य सुगंधपुष्पाक्षतोदकमंजलिं गृहीत्वा

प्र. महापुरुषमावाहयेत। ॐ पुरुषमावाहयामि॥ ॐ भुवः पुरुषं॰ ॐ स्वः पुरुषं॰ ॐ भूर्भुवःस्वःपुरुषं॰ इत्यावा
हस्वागतंभगवतोमहापुरुषस्य-भगवतएतदासनंदर्भमयकूर्चैततोगायत्र्याभिमंत्रितंताम्रार्घपात्रं
१२. सोदकंसपवित्रंसगंधपुष्पाक्षतंभूमौनिधाय। ॐमित्यादित्यंदर्शयित्वात्रीण्यपरोलिपाद्यंदत्वाप्रणवेना
र्घ्यंचदद्यात॥ मधुपर्कंचदत्वा॥ आपादेरेण्यपावनैर्मार्जयित्वापात्रांतरेणगंधपुष्पाक्षतमिश्रजलेनतर्प
यति॥ केशवं·नारायणं·माधवं·गोविंदं·विष्णुं·मधुसूदनं·त्रिविक्रमं·वामनं·श्रीधरं·हृषीकेशं·पद्मना
भं·दामोदरमिति॥ एतैरेवनामभिःपूजयेत॥ युवंवस्त्राणिनिवाससी·इदंविष्णुरितिगंधं॥ ताद्रूप्माणीति
पुष्पाणि। धूरावर्ताधेनुमतीत्यक्षताः॥ गायत्र्याधूपं। उद्दीप्यस्वेतिदीपं॥ ताद्रूप्माणीतिनैवेद्यं॥ भक्ष्यभो
ज्यतांबूलादिदत्वापुष्पांजलिंदद्यात॥ द्वादशनामभिरेवविष्णवेद्यार्करादिमिथ्यमंनंबलिंदद्यात॥ केशवाद

मंत्रलिंगरुद्राणगर्भरक्षांकुरु॥ सर्वपापांकुशलंकुरु॥ ए.तेनानेनविष्णुबलिविधानेनभगवान्श्रीमहाविष्णुः
प्रीतोभूत्वाअस्याःकुशलंकुरु॥विष्णुस्तोत्रंपठित्वाॐभूःपुरुषमुद्वासयामितंपुरुषमुद्वासयेत्॥
तंनैवेद्यशेषंपत्नीप्राशयेत्॥ तावत्पदंयावत्सर्वंविष्णुंबलिमुद्धृत्यब्राह्मणायदत्वास्वयंभुंजीया
त्॥ ॥अनंतात्मजश्रीपुरुषोत्तमोयंश्रीविश्वनाथंश्रातकर्ममान्यः॥विश्वप्रकाशाभिधपद्धतौतत्कृतावभू
द्विष्णुबलेःप्रकर्म॥ ॥अथजातकर्म॥जातकुमारपितास्वकंठाद्यज्ञोपवीतमुत्तार्यजातस्यकुमारस्यनाभौ
निधायस्वगृहाद्वागाद्बहिःस्नात्वागत्यपादौप्रक्षाल्याचम्यप्राणानायम्यतिथ्यश्चवर्णांते अमुककुमारस्यगर्भाभि
कबीजकेनोनिर्हरणार्थंजातकर्माख्येनकर्मणासंस्कारिष्यइतिसंकल्प्यगणेशवरुणौसंपूज्यपुण्याहंवाचयि
त्वाभ्युदयिकंविधायादित्यस्पर्शातिवात्सप्रेणानुवाकेनाभिमृश्यअश्मिनद्भवसद्भवंपुष्पाण्येधमानःस्वेगृहे॥

प्र॰ इति यजुषास्त्वां कुर्पंचेतूय। अंगादंगात्संभवसि हृदयादधिजायसे॥ आत्मा वै पुत्रनामासि स जीव शरदः श
तं॥ अश्माभव परशुर्भव हिरण्यमस्तृतं भव॥ पशूनां त्वा हिंकारेणाभिजिघ्राम्यसौ॥ इति द्वाभ्यामभिमंत्र्य
१३ मा विलयत्र कुमारस्य नक्षत्रनाम्ना संबुध्यते॰ नोपांशु कुमारं निर्दिशति॥ तच्च नामेत्थं प्रयुंजीत॥ कार्तिकरो
हिणमार्गशीर्षार्द्रा पुनर्वसू तिष्याश्लेषमाघफाल्गुनोत्तरहस्तचैत्रस्वातिविशाखानूराधज्येष्ठमूलकाषा
ढाषाढश्रावणश्रविष्ठाशतभिषक्प्रोष्ठपदप्रोष्ठपदरेवताश्वयुजअपभरणआपभरणीति
वा॥ स्त्रिया एकारांतानि पुनर्वसोरोकारश्लेषे च॥ तथा च कारिकाकृत्तो॥ रोरेममस्त्येषु पुरो हिरादौ क्षांत्येन्त्र वा
त्यश्रवणाश्वयुक्त॥ शेषेषु वास्त्वौः कपरः स्वरांत्यः स्थाप्यो रदीर्घः सविसर्ग इष्टः॥ पुनरंगादिति द्वाभ्यां मू
र्धन्यवघ्राणमेताभ्यामेव दक्षिणे कर्णे जपं चत्वादर्भेण हिरण्यानि स्वर्यं बध्वा तेन घृतयुक्तं मधु ग्राशीत

मेधांतेदेवः सविता मेधांदेवी सरस्वती॥ मेधांतेअश्विनौदेवावाधत्तांपुष्करस्रजा॥ त्वयिमेधांत्वयिप्रजां
त्वय्यग्निःस्तेजोदधातु। त्वयिमेधांत्वयिप्रजांत्वयींद्रइंद्रियंदधातु। त्वयिमेधांत्वयिप्रजांत्वयिसूर्यो
भ्राजोदधातु॥ इतिकुमारंसरूपाशयित्वा॥ क्षेत्रियैत्वानिर्ऋत्यैत्वाद्रुहोमुंचामिवरुणस्यपाशात्॥
अनागसंब्रह्मणेत्वाकरोमिशिवेतेद्यावापृथिवीउभेमे॥ शंतेअग्निःसहाद्भिरस्तु शंद्यावापृथिवीसहौ
षधीभिः॥ शमंतरिक्षंसहवातेनते शंतेचतस्रःप्रदिशोभवंतु॥ यादैवीश्चतस्रःप्रदिशः। वातप
त्नीरभिसूर्योविचष्टे॥ तासांत्वाजरसआदधामि॥ प्रयक्ष्मएतुनिर्ऋतिंपराचैः॥ प्रमोचियक्ष्माद्दुरिता
दवर्त्यै॥ द्रुहःपाशान्निर्ऋत्यैचोदमोचि॥ आहाअवर्तिमविदत्स्योनं॥ अप्यभूद्भद्रेसुकृतस्यलोके॥ सू
र्यऋतंतमसोग्राह्यायत्॥ देवाअमुंचन्नसृजन्व्येनसः॥ एवमहमिमंक्षेत्रियाज्जामिशंसात्। द्रुहो

ग्र॰ मुंचामिवरुणस्यपाशात्। इतिपंचभिर्मंत्रैः कुमारं संस्नापयति॥ भूःस्वाहा। भुवःस्वाहा। स्वः
स्वाहो॰ स्वाहा॥ इतिएवदाज्यंकांस्यपात्रेणकुमारंसस्नात २ स्याघ्रापयित्वाद्भिःशेषं संसृज्यगोष्ठे
३४ निनयेत्॥ मातेकुमारं रक्षोवधीन्माधेनुरत्याचारिणी॥ प्रियाधनस्यभूयाएधमानाःस्वगृ
हे॥ इतिकुमारंमातुरंकमाधाय। अयंकुमारोजरांधयतुदीर्घमायुः। यस्मैत्वं स्तनप्रप्यायायुर्व
र्चोयशोबलं॥ इतिकुमारं दक्षिणं स्तनंप्रतिधाप्य॥ यद्भूमेर्हृदयंदिविचंद्रमसिश्रितं॥ तदुर्विप
श्यंमाहंपौत्रमघंरुदम्॥ यत्तेसुसीमेहृदयवेदाहंतत्प्रजापतौ। वेदामतस्यतेवयंमाहंपौत्रमघं २
रुदं॥ इतिद्वाभ्यांजाय्यापृथिवीमभिमृश्य॥ नामयतिनरुदतियत्रवयंवदामसि॥ यत्रचाभिमृ
शामसि॥ इतितत्रसंविष्टंकुमारमुपस्पृश्य॥ आपःसुप्तेषुजाग्रतरक्षांसिनिरितोनुदध्वं॥ इ

तिकुमारस्याग्नेरः समीपे जलपूर्णं कलशं निधाय। अथाग्निं प्रतिष्ठाप्य पर्युक्ष्य परिस्तीर्यालंकृ
त्य परिषिच्य साज्यान् सर्षपान् फलीकरणमिश्रान् अंजलिना सकृदादाय। ॐ अयं कलिं पतयन्तं
श्वानमिवोद्वृद्धं। अजां वाशितामिव मरुतः पर्याध्वं स्वाहा॥ इति सकृत्होमं कृत्वा मरुद्भ्य इदं न
मम पुनः स्वाहा। मरुद्भ्य इदं न मम पुनः स्वा॰ मरुद्भ्य इदं॰ इति त्रिर्जुहुयात्॥ एवमाहुतित्रयस्य
काहुतिः। एवमेवाहावाहुतयः। एवं पुनरंजलिनादाय। शंडेरथः शंडिकेर उलूखलः। च्यवनो न
श्यतादितः स्वाहा॥ मरुद्भ्य इदं॰ स्वाहा मरुद्भ्यः। स्वाहा मरुद्भ्यः इदं॰ ३। २। अयः शंडो मर्क उपवी
र उलूखलः। च्यवनो नश्यतादितः स्वाहा। त्याग पूर्ववत्॥ ३। ३। केशिनीः श्वलोमिनीः खजापो
जोपकाशिनीः। अपेत नश्यतादितः स्वाहा॥ ४। मिश्रवाससः कौबेरकारक्षो राजेनप्रेषिताः॥

२. ग्रामं सजातयोगछंती छंतोपविताहृतान्स्वाहा ॥५॥ एतानघ्नंते तानगृह्णीतेत्ययं ब्रह्मणस्पुत्रः ॥
तानग्निः पर्यसरत्तानिंद्रस्तान्बृहस्पतिः। तानहं वेदब्राह्मणः प्रमृशतः कूटदंतान्विकेशान्लंब
५ नस्तनान्स्वाहा ॥६॥ नक्तंचारिण उरस्पेशान् छूलहस्तान्कपालपान। पूर्व एषां पतेत्युच्चैः श्राव्यक
र्णकः ॥ मातापि चान्यास पर्तिग्रामे विधुरा मंछंतीः स्वाहा ॥७॥ मरुद्भ्यः ३॥ निशीथचारिणीः स्वसा
संधिना प्रेक्षते कुलं। यास्य पतंबोधयति यस्यो विजातायां मनः। तासां त्वं कृष्णवर्त्मने क्लोमानं
हृदयं यकृत ॥ अग्ने अक्षीणि निर्दह स्वाहा ९। अग्नये इदं पुनः स्वाहा मरुद्भ्यः इदं २ उत्पन्ना
याकृतीर्ऋत्वा गर्भपालान सर्वं शक्तिप्रविष्टे प्रविष्ट एव तूष्णीमग्नावावपतीति ॥ एवमद्भ रक्षोपि २
तथा कुर्यादादशरात्रं। न तथा जातस्य होमे मरुतः सप्तखादाश्च देवताः। अस्ये मग्निरितिग्राह

द्धिरण्याभ्युदयं ततः। यदि गर्भाधानपुंसवनसीमंतानि स्वस्वकालेन कृतानि तदा प्रथमदिने जातकर्म न कुर्यात्॥
एकादशे द्वादशे वा दिने गर्भाधानपुंसवनसीमंतो जातकर्म च॥ स्वस्वकालेन कुर्याच्चेन्नाम्नासह विधीयत इति।
अथ शुद्धिसमयनिर्णयः॥ अत्रिः। पुंजन्मनि सपिंडानां दशाहाच्छुद्धिरिष्यते॥ त्र्यहादेकोदकानां च एकाहं सूत
के क्वचित्॥ स्त्रीजन्मनि सपिंडानां सोदकानां त्र्यहाच्छुचिः॥ स्त्रीषु त्रिपुरुषं ज्ञेयं सापिंडं चाद्विजोत्तमाः॥ लेपभा
जः चतुर्थाद्याः पित्राद्याः पिंडभागिनः। एकोदकाः स्मृतश्चोर्ध्वं निर्दिष्टं साप्तपौरुषमिति॥ अथ चास्य प्रा
नुवाकः॥ ईद्दिवस्परि प्रथमं जज्ञे अग्निरस्माद्द्वितीयं परिजातवेदाः॥ तृतीयमप्सु नृमणा अजस्रमिंधान ए
नं जरते स्वाधीः॥ विद्माते अग्ने त्रेधा त्रयाणि विद्माते सधा विभृतं पुरुत्रा॥ विद्माते नाम परमं गुहा यद्विद्मा
तमुत्सं यत आजगंथ॥ समुद्रे त्वा नृमणा अप्स्वंतर्नृचक्षा ईधे दिवो अग्न ऊधन्॥ तृतीये त्वा रजसि त

·२· ऋक्वाःसमत्रस्ययोनौमाद्विपाआदिद्वन॥ अक्रंददग्निःस्तनयंनिवद्यौःक्षामारेरिहद्वीरुधःसमंजन॥ सद्यो
जज्ञानोविहीमिद्धोअख्यदारोदसीभानुनाभात्यंतः॥ उशिक्पावकोअरतिःसुमेधामर्तेष्वग्निरमृतोनिधा
२६ यि॥ इयर्तिधूममरुषंभरिभ्रदुच्छुक्रेणशोचिषाद्यामिनक्षन॥ विश्वस्यकेतुर्भुवनस्यगर्भआरोदसीः
अपृणाज्जायमानः॥ वीळुंचिदद्रिमभिनत्परायजनायदग्निमयजंतपंच॥ श्रीणामुदारोधरुणोरयी
णांमनीषाणांप्रार्पणःसोमगोपाः॥ वसोःसूनुःसहसोअप्सुराजाविभात्यग्रउषसामिधानः॥ यस्ते
अद्यकृणवद्भद्रशोचेपूपंदेवघृतवंतमग्ने॥ प्रतंनयप्रतरंवस्योअच्छाभिद्युम्नंदेवभक्तंयविष्ठ॥ आतं २१
भजसौश्रवसेष्वग्नउक्थउक्थआभजशस्यमाने॥ प्रियःसूर्येप्रियोअग्नाभवात्युज्जातेनभिनददुज्ज
नित्वैः॥ त्वामग्नेयजमानाअनुद्यून्विश्वावसूनिदधिरेवार्याणि॥ त्वयासहद्रविणमिच्छमानाव्रजंगोम

तमग्निर्ह्रार्जोविर्भ्रुः॥ हृन्नानोरुक्मउर्व्याव्यद्यौदुर्मर्षमायुःश्रियेरुचानः॥ अग्निरमृतोअभवद्वयोभिर्यदेनं
द्यौर्जनयत्सुरेताः॥ अनेनवात्सप्रानुवाकेनाभिमृशात्॥ ॥अजीजनन्त्रीपुरुषोत्तमोयंश्रीविश्वनाथंश्रु
तिकर्ममान्यः॥विश्वप्रकाशाभिधपद्धतौतत्कृतौसमाप्तंखलुजातकर्म॥ ॥अथयदिशीघ्रप्रसवो
नभवेत्तदाऽरण्यकोक्तंब्राह्मणोक्तंवशीघ्रप्रसवाध्यायंश्रावयेत्॥अपक्रामतगर्भिण्यः॥ॐअष्ट
योनीमष्टपुत्रां॥अष्टपत्नीमिमांमही॥अहंवेदनमेमृत्युः॥नचामृत्युरघाहरत्॥अष्टयोन्यष्टपुत्रं॥अ
ष्टपदिदमंतरिक्षं॥अहंवेदनमेमृत्युः॥नचामृत्युरघाहरत॥अष्टयोनीमष्टपुत्रां॥अष्टपत्नीममूंदं॥
॥अहंवेदनमेमृत्युः॥नचामृत्युरघाहरत्॥सुत्रामाणंमहीमूषु॥अदितिर्द्यौरदितिरंतरिक्षं॥अदिति
र्मातासपितासपुत्रः॥विश्वेदेवाअदितिःपंचजनाः॥अदितिर्जातमदितिर्जनित्वं॥अष्टौपुत्रासोअदितेः॥

प्र· येजाताःस्तन्वःपरि। देवांउपप्रैत्संसभिः॥ २॥ परामार्तांडमास्यत। ससंभिः पुत्रैरदितिः। उपप्रैत्पूर्व्यंयुगं
।प्रजायैमृत्यवेनत। परामार्तांडमाभरदिति॥ताननुक्रमिष्यामः।मित्रश्चवरुणश्च।धाताचार्यमाच।अं
१७ शश्चभगश्च॥इंद्रश्चविवस्वांश्चेत्येते।हिरण्यगर्भोहंसःशुचिषत॥ब्रह्मजज्ञानंतदित्यदमिति॥गर्भःप्र
जापत्यः।अथपुरुषःसप्तपुरुषः।हिरण्यगर्भादिचत्वारःप्रतीकाःपठनीयाः।हिरण्यगर्भःसमवर्तताग्रे
भूतस्यजातःपतिरेकआसीत।सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम॥हंसः।ब्रह्मतदित्य
दंनविधिकंतविद्वान्यन्मतमुनेरप्यातिदेवान्॥अथाहुतीयेनुवाकः॥ॐप्रजापतिरकामयतप्रजायेये १२
ति॥सतपोतप्यत॥सोनयीनभवत।सहरितनूश्यावोभवत॥तस्मात्स्मतर्वनी॥हरिणीसतीश्यावाभ
वति॥सविजायमानोगर्भेणानाम्यत॥अतोंतःकृष्णश्यावोभवत॥तस्मात्जातःकृष्णःश्यावोभवति।

तस्याम्करेवाजीवत्॥१॥ तेनासूनसृजत तदसुराणामसुरत्वं॥ यएवमसुराणामसुरत्वंवेद॥
असुमानेवभवति॥ नैनमसुर्जहाति॥ सोसुरान्सृष्ट्वापितेवामन्यत तदनुपितॄनसृजत॥ तत्पितॄणांपि
तृत्वं॥ यएवंपितॄणांपितृत्वंवेद॥ पितेवस्वानांभवति॥२॥ यंत्यस्यपितरोहवं॥ सपितॄन्सृष्ट्वामनस्यत्
॥ तदनुमनुष्यानसृजत॥ तन्मनुष्याणांमनुष्यत्वं यएवंमनुष्याणांमनुष्यत्वंवेद॥ मनस्व्येवभवति॥
नैनंमनुर्जहाति॥ तस्मैमनुष्यान्ससृजानायदिवादेवत्राभवत्॥ तदनुदेवानसृजत॥३॥ तद्देवानांदेव
त्वं॥ यएवंदेवानांदेवत्वंवेद॥ दिवाहैवास्यदेवत्राभवति॥ तानिवाएतानिचत्वार्यंभांसि॥ देवामनुष्याः
पितरोसुराः॥ तेषुसर्वेष्वंभोनभइवभवति॥ यएवंवेद॥ इतिब्राह्मणेद्वितीयाष्टकेशीघ्रप्रसवानुवा
कं॥ पूर्वोक्तारण्यकप्रथममंत्रलोकानुवाकंचश्रावयेत्॥ आचरेयंशीघ्रंप्रसवोभवति॥ इतिविश्वप्रका

हस्तादिना बलिं दद्यात्। क्षेत्रपाल नमस्तुभ्यं सर्वशांतिफलप्रद॥ बालस्य विघ्ननाशाय २

नेजातकर्मः॥ ॥चक्रव्यूहं च दर्शयेत्॥ अथ षष्ठिकापूजा॥ अथ पुत्रेजाते षष्ठिदिने षष्ठिकापूजा॥ अथ
मंवाद्दिरेव स्वस्तिवाचनं कृत्वा महागणपतिपूजां कृत्वा॥ क्षेत्रपालपूजां च तुष्कोपरि विधाय गृहाण गृह्ण
इमां बलिं॥ भूतदैत्यपिशाचाद्या गंधर्वा रक्षसां गणाः॥ शुभं कुर्वंतु ते सर्वे मम गृह्णंत्विमां बलिं॥ योगि
नी डाकिनी चैव मातरो निवसंति याः॥ शांतिं कुर्वंतु ते सर्वे मम गृह्णंत्विमां बलिं॥ नानारूपधराः स
र्वा मातरो देवयोनयः॥ स्वयं रक्षंतु मे पुत्रं तुष्टा गृह्णंत्विमां बलिं॥ आदित्याद्या ग्रहा ये च नित्यं स्वर्गनिवा
सिनः॥ रक्षां कुर्वंतु ते सर्वे मम गृह्णंत्विमां बलिं॥ ततो गृहं प्रविश्य द्वारदेशे गणपतिपूजां कृत्वा। गणपत ११९
ये फेणिकादि नैवेद्यं दत्वा॥ प्रार्थयेत॥ सर्वविघ्नहरोसि त्वं मे कुरु तो गजानन॥ षष्ठी गृहार्चितः प्रीत्या भु
भं दीर्घायुषं कुरु॥ लंबोदर महाभाग सर्वोपद्रवनाशन॥ त्वत्प्रसादादविघ्नेन चिरं जीवतु बालकः॥ गृ

दिक्पाला ग्रहयोगिन्यः स्वःस्थानप्रतिवासिनः॥ शांतिं कुर्वंतु ते स
र्वे मम गृह्णंत्विमां बलिम्॥३

गणपतयेनमः। क्षेत्रपालायनमः॥ अथषष्ठीपूजातन्त्रक्रमः॥ ॥अद्येत्यादिसंकल्प्य॰ ममाभिनवः
जातस्यकुमारस्यसकुटुंबस्यसपरिवारस्यसर्वापच्छांतिदीर्घायुष्ट्यानैरुज्यसबालिंतगौरीपुत्रस्कंद
रक्षणवृद्ध्यर्थादिषोडश्यामातृपूजापूर्वकषट्कृत्तिकासहितषष्ठिकापूजनमहंकरिष्ये। प्रतिष्ठावाद
नादिकुर्यात॥ आयायाहिवरदेदेविमहाषष्ठीतिविश्रुता। शक्तिभिःसहपुत्रंमेरक्षजागरवासरे॥ दी
र्घस्वरयुक्तेनषकारेणन्यासंकुर्यात॥ ॐषांअंगुष्ठाभ्यांनमः। ॐषींतर्जनीभ्यां॰ ॐषूंमध्यमाभ्यां
॰ ॐषैंअनामिकाभ्यां॰ ॐषौंकनिष्ठिकाभ्यां॰ ॐषः करतलकरपृष्ठाभ्यां॰॥ एवंहृदयादि॥
अथषोडशमातरः॥ अकृत्वामातृयागंतुवैदिकंयःसमाचरेत॥ तत्रक्रोधसमाविष्टादिंसामि
च्छंतिमातरः॥ कर्मादिषुचसर्वेषुमातरःसगणाधिपाः॥ पूजनीयाःप्रयत्नेनपूजिताःपूजयंतिताः।

नामानि॰॥ गौरीपद्माशची मेधा सावित्री विजया जया॥ देवसेना स्वधा स्वाहा मातरो लोकमातरः॥
हृष्टिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह। इति। ऋद्धिर्वा संभूतिसंज्ञा च नीतिः संनतिरेव च॥ अनसूया
क्षमा चैव षडेताः कान्तिकामताः॥ ब्राह्मी माहेश्वरी लक्ष्मी कौमारी वैष्णवी तथा॥ वाराही च तथेंद्राणी
चामुंडा चाष्टमातरः॥ अणिमा महिमा चैव गरिमा लघिमा तथा॥ प्राप्तिः प्राकाम्यमीशित्वं वशित्वं
चाष्टभूतयः॥ सरस्वत्या सह ब्रह्मा भवान्या शंकरस्तथा॥ लक्ष्म्या नारायणः पूज्यो लोकपालादय
स्तथा॥ गणेशादुर्गा वा स्वाख्या काश्यपस्कंदश्च मंबुज। नवग्रहास्तथा पूज्याः साधिप्रत्यधिदेवताः।
दिक्पालांश्च तथेंद्रादिकुड्यादक्षुत थालिखेत्॥ एवं च पूजयेद्दुर्गां उपचारैः प्रपूजयेत्॥ वस्त्रैर्गं
धैर्धूपदीपैर्नैवेद्यैर्दक्षिणादिभिः। पालिका फाणिकाभिश्च वत्सरैः पुष्पमाल्यादिभिः पुष्पैः

स्नायकालिकेर्यजेत्॥ वसोःपवित्रमंत्रेण वसोर्धारांतु कारयेत्॥ घृतेन धाराविधमांप्रार्थयेत्षष्ठिदे
वता॥ गौर्याःपुत्रो यथास्कंदः शिशुसंरक्षितस्तथा॥ तथा मामाप्ययं बालो रक्ष्यतां षष्ठिके नमः
ॐ षष्ठिभटारिकायै सांगायै सपरिवारायै सायुधायै सवाहनायै नमः॥ कार्तिकेयमहाबा
हो गौरीहृदयनंदन॥ कुमारं रक्ष भीतिभ्यः पार्वतीनन्दन मोस्तुते॥ शक्तिस्त्वं मम देवानां लो
कानां हितकारिणी॥ मातर्बालमिमं रक्ष महाषष्ठि नमोस्तुते॥ रुद्राणी रुद्ररूपेण महाविघ्नवि
नाशिनी॥ प्रसन्ने वरदे देवि स्वयं रक्षस्व बालकं॥ भूतदैत्यपिशाचेभ्यो डाकिनीयोगिनीषु च
मातर्वै रक्ष मे पुत्रं श्वापदं पन्नगेषु च॥ त्वमेव वैष्णवी देवी ब्रह्माणी च व्यवस्थिता॥ रुद्रश
क्तिः समाख्याता महाषष्ठि नमोस्तुते॥ गोमंथानं संपूजयेत्॥ मंथानं तद्दिलोके पुर

प्र. वदेवेनानिर्मिताः। पूजितश्चविधानेनस्तुतिरक्षांकुरुष्वमे॥ खड्गप्रार्थना॥ असिर्विषासनः
२० खड्गस्तीक्ष्णधारोदुरासदः। पुत्रस्यविजयश्चैवधर्मपालनमोस्तुते॥ वंश पूजा॥ सर्वमंगल
मांगल्येगोविंदस्यकरेस्थिता॥ चंद्रवर्धयमेवंशंसदानंदनमोस्तुते॥ मथुरंयद्बलंयच्चविस्मार
मितलेजसि॥ दरस्ययद्बलंसर्वतद्बलंपुत्रकेमम॥ त्रैलोक्यवर्धनश्रीमान्सप्तद्वीपविवर्धनः
शांतिंकुरुगदापाणेनारायणनमोस्तुते॥ अथबालकप्पजननेन॥ संस्थाप्यदेवतानांच
ऋषीणांभक्तभक्तवत्सल॥ अतसंरक्षमेपुत्रंमहाषष्ठिनमोस्तुते॥ जननीसर्वभूतानांबा २
लकानांविशेषतः॥ नारायणीस्वरूपेणपुत्रंमेरक्षसर्वतः॥ भूतदैत्यपिशाचेभ्योडाकि
नीभ्यः शरीरकैः। सुतं मे स्व सुतं कृत्वा रक्ष रक्ष वरानने॥ एवं रक्ष महाषष्ठी सदा

त्वं विघ्ननाशिनी ॥ बालं समातरं रक्ष नित्यं मंतः कुटास्थिता ॥ सर्वभूतहिते मातः जगतामुपकारि
णी ॥ सर्वतः षष्ठिरूपेण बालरक्षां कुरुष्व मे ॥ षष्ठिदेवि महाभागे हिताहितवरप्रदे ॥ त्वत्प्रसाद
द्विघ्नेन चिरंजीवतु मे सुतः ॥ अस्मिंस्तु सूतिकागारे देवीभिः परिवारिता ॥ रक्षां कुरु महाभा
गे सर्वोपद्रवनाशिनी ॥ स्वयं मम कुलान्वयोरक्षार्थं पादयोस्तव ॥ नीतो नीत महाभागे चिरं
जीवतु बालकः ॥ रूपं देहि जयं देहि भाग्यं भगवति देहि मे ॥ पुत्रान्देहि धनं देहि सर्वान्कामांश्च दे
हि मे ॥ ॥ इति षष्ठिकापूजाविधिः ॥ अथ प्रसूतिस्नानं ॥ चित्राविशाखाश्रुतिकृत्तिकार्द्रामघा
श्विमूला मृगरोहिणीषु ॥ स्नाया प्रसूता यदि भेषु तेषु सूतिः प्रसूतिं न पुनः प्ररोहे ॥ प्रति
पच्च नवम्यां च षष्ठ्यां चतुर्दश्यां निशुक्रयोः ॥ विधवा त्रीणि जन्मानि सूतिस्नानं न कारयेत् ॥ ति

प्र॰ ध्यादितिकरस्वातिंमित्रपूर्वात्रयोत्तरा। वसुपूषाश्वेहतारास्मृतिस्नानेरविर्गुरुः। शुभाश्चतिथ
९ योन्याश्चदर्शरिक्ताश्चवर्जयेत्॥ याम्यासार्पेंद्रवारुण्यामध्यसौमारचंद्रमा॥ ॥इतिप्रस
तिस्नानं॥ ॥चंडेश्वरः॥ अथनामकरणं॥ एकादशेदिनेनामकरणंद्वादशेपिवा॥ जन्मनः
प्रभृतिएकादशेद्वादशेवाद्दिनेमातापितरौभद्रासनोपविष्टौकलशद्वयंसंस्थाप्यपूर्वोक्तरीत्या
पुण्याहंवाचयित्वापुनःप्राणानायम्याद्येत्यादिसंकल्प्यास्यकुमारस्यगर्भिकबैजिकैनोनि
र्हरणद्वारालौकिकवैदिकव्यवहारासिध्यर्थंनामकरिष्यावहे॥ अथात्रश्रुतिः॥ ममनामप्र २२
थमंजातवेदः॥ पितामाताचदधतुर्यदग्रऽइति॥ ततःआभ्युदयिकंविधायविशालकांस्य

पात्रे तंडुलान्पूरयित्वा कुमारस्य जन्म मासनामं नक्षत्रचरणनाम स्वव्यवहारनामानि हिरण्येनालिख्य
ब्राह्मणैः सह प्रातिष्ठां विधाय नामदेवताभ्यो नम इति व्याहृतिपूर्वं षोडशोपचारैः संपूज्य कुमार
स्य दक्षिणकर्णे अमुकनामासीत्युक्त्वा शिरसि अक्षतान्निक्षिपेत्॥ तानि च नामानि। कृष्णोऽनंतोऽच्यु
तश्चक्री वैकुंठोऽथ जनार्दनः॥ उपेंद्रो यज्ञपुरुषो वासुदेवस्तथा हरिः॥ योगीशः पुंडरीकाक्षो मार्ग
मासादनुक्रमात्॥ नक्षत्रचरणनाम तु। चूचेचोलाश्विनीत्यादि ज्योतिःशास्त्रे ज्ञातव्यं। द्व्यक्षरं
चतुरक्षरं वा नाम पूर्वमाख्यातोत्तरं घोषवदाद्यंतरंतस्थं। व्यवहारनाम यथेच्छा। कुमार्या अप्ययु
जाक्षरेण नाम दद्यात्॥ आवासादेत्य पुत्रस्य अंगादंगादिति द्वाभ्यामभिमंत्र्य मूर्धन्यवघ्राणं दक्षि
णकर्णे जपेच्च॥ अग्निरायुष्मानिति पंच मंत्रान्जपेत्। कुमार्याः सर्वमेतन्मंत्रवर्जं कुर्यात्। सर्व

प्र· स्मादात्मनः संभूतासि मज्जीव शरदः शतं इति कुमार्या अभिमंत्रणमेव विशेषः। आरात्रिकं विधाय ब्रा
१२ ह्मणान्भोजयेत॥ अग्निरायुष्मान्स वनस्पतिभिरायुष्मांस्तेन त्वायुषायुष्मंतं करोमि। सोम आयुष्मा
न्स ओषधीभिरायुष्मांस्तेन त्वायुषायुष्मंतं करोमि॥ २। यज्ञ आयुष्मान्स दक्षिणाभिरायुष्मांस्तेन० ३
ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तेन० ४। देवा आयुष्मंतस्तेमृतेनायुष्मंतः स्तेन त्वायुषायुष्मंतं करोमि।
इत्यनुषंगः॥ ॥ अजीजनच्छ्रीपुरुषोत्तमो यं श्रीविश्वनाथं श्रुतिकर्ममान्या॥ विश्वप्रकाशाभिधप
द्धतीतत्कृतावभूत्नामकृतिः स देव॥ ॥ चूचेचोलापदेषा घलीलूलेलोभरण्यथ॥ अइउए कृत्ति
का च ओवावीवू रोहिणी॥ वेवोककी मृगशिरः कुघंङछ आर्द्रभं॥ केकोहही पुनर्वसोर्हूहेहोडा १
च पुष्यभे॥ डीडूडेडो उमे सार्पमसी मूमेमघाभिधे॥ मोटाटीटू उमे भाग्यरेटेटोपपी॥ च उत्तरा॥ पू

षणठश्चहस्तर्से पेरोरीचवाष्ट्रभे॥ रूरेरोनास्वातितारेतीलूतेतोविशाखभे॥ ननीनूनेनुराधा
स्यान्नोयायीयूतथेंद्रभे॥ येयोभभिमूलधिह्मपूर्वाषाढाभुधाफढा॥ भेभोजजीवैश्वेदेवेजोजू
जोखांभिजिच्चभे॥ खिखूखेखोश्रवणभगगीगूगेचवासवं॥ गोसासीसूश्शतभिषकूसेसोद
दीह्यजेकपात॥ दुश्यञथोत्तराभाद्रदेदोचचीचरेवती॥ ॥ इतिविश्वनाथविरचितेविश्वप्रकाश
केनामकरणं॥ अथसूर्यचंद्रदर्शनं॥ तद्यथा। अंगणेभूमिमुपलिप्यद्वादशारंसूर्यमंडलं
षोडशारंचंद्रंलिखित्वापंचवर्णैनिपरिपूर्यव्याहृतिपूर्वकंसूर्यमंत्राभ्यांषोडशोपचारैः सं
पूज्य। पृथिकानैवेद्यंदत्वाकुमारस्यनीयसूर्यंदर्शयति। उद्वयंतमसस्परि· उदुत्यं· चित्रंदे
वाना· आसत्येन· तद्विष्णोः परमंपदं· इतिनमस्कृत्य· देवीः षडुर्वी· महास्माद्वि· महत्तः

प्र. श्वाय· नवोनवो भवति· आप्यायस्व· सोमोधेनुं· इतिचंद्रमसंनमस्कृत्यप्रदक्षिणंकृत्वोनमस्कृ
त्यगृहीतःप्रविश्यब्राह्मणेभ्योदक्षिणांदत्वासुवासिनीभ्यःवायनानिपोलिकादीनिदत्वानमस्कृ
२३ त्वारात्रिकंविधायाशिषोवाचयेत॥ ॥इतिसूर्यचंद्रदर्शनं॥ अथोपनिष्क्रमणं। चतुर्थेमासि
निष्क्रमणमिति॥ शुभर्क्षतिथिवारयोगेषुसानुकूलेचंद्रमसि॥ अश्विनीमृगशिरःपुनर्वसुपुष्य
हस्तानुराधाश्रवणधनिष्ठारेवत्यउत्तमाः॥ इष्टदेवतापूजादिकंविधायनमस्कृत्य॥ ॐ उक्राते
वनेकुने· स्वस्तिनोमिमीतेत्यादि· स्वस्तिनइंद्रः। कुमारमलंकृत्यमंगलतूर्यनिर्घोषैःसहदेवालये ३
गंगादिनदी। तीरमुद्यानारामबंधुगृहाणामन्यतमस्थानंगत्वामहोत्सवपूर्वकंसगुडादिद्रव्ययुत
कांस्यपात्रादिकंबंधुदत्तंयत्किंचितशाकुनादिकंगृहीत्वागृहंपुनरागत्यपुण्याहंवाचयित्वाद

क्षिणां दत्वारात्रिकं विधायाशिषो वाचयित्वा मदांतं मुत्सवं कुर्यात्॥ ॥इत्युपनिष्क्रमः॥ अथ कर्णवेधः॥ तस्य का
लः जन्मदिनाद् दशमे द्वादशे षोडशे ऽह्नि वा सप्तमे ऽष्टमे वा मासः॥ यथा कुलाचारं वा॥ शुभदिने चंद्रतारानुकूले
पुण्याहं वाचयित्वा कर्णवेधाख्यं कर्म करिष्ये॥ कुमारमलंकृत्य॥ ॐ श्रोत्रेण भद्रमुत शृण्वंति सत्यं।१॥ येन प्राच्या
उत दक्षिणा॥२॥ इति द्वाभ्यामभिमंत्र्य सुवर्णसूच्या दक्षिणवामकर्णौ वेधयेत्॥ गायत्री त्रिष्टुबिति दक्षि
णे द्विपदाया चतुष्पदा॥ इति वामे ततः सुवर्णसूत्रं प्रतिमुंचति। पट्टसूत्रं। शाणसूत्रं वा॥ वरुणस्य स्कंभ
नमसीति दक्षिणे वरुणस्य स्कंभसर्जनमसीति वामे। सूर्यरश्मिसंपातो यथा भवति तथा वर्धयेत्। कुंड
लधारणयोग्ये भवति तावदिति। आरात्रिकं विधायाशिषो वाचयेत् विप्रेभ्यो दक्षिणां दद्यात्॥ ॥इति
कर्णवेधः। अथान्नप्राशनं॥ रिक्तां दिनक्षयं नंदां द्वादशीमष्टमीं तथा॥ त्यक्त्वान्यास्तिथयः श्रेष्ठाः प्राशने शुभदा

स. सराः। सोमेशुक्रे च मंदाग्निः शनिभौमेग्निशूलक्षयः। बुधे वर्चे च तथा जीवे भृगौ प्राशनमुत्तमं। अ
न्नप्राशनमारभ्य प्रतिसरविधिः स्मृतः॥ जन्मनः प्रभृति षष्ठे मासि पुण्याहं वाचयित्वा प्राशन
२४ प्रतिसरारंभ कर्माणि कृत्वाभ्युदयिकं विधाय। तथा षष्ठे मासि कृते श्राद्धे वाचयित्वा। शुभे पुण्यैः। मा
र्जयित्वा प्रतिसरं बध्वास्य विधिवत्करुते प्राणानायम्य अमुं कुमारं दक्षिणतः मातुरंके उपवेश्यान्न
प्राशनाख्येन कर्मणा संस्करिष्य इति संकल्प्य सर्वरसैः सार्द्रमन्नं कांस्यपात्रे परिपूर्य व्याहृतिभिर्गा
यत्र्या चान्नं प्रोक्ष्य। अन्नपतेन्नस्य नो धेह्यनमीवस्य शुष्मिणः। प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे
चतुष्पदे॥ इत्यन्नमभिमंत्र्य दधिमधुघृतोदनान्संसृज्य हिरण्येन सह गृहीत्वा। भूरपां त्वौषधीनां २२
रसं प्राशयामि शिवास्त आप ओषधयः संतु नमीवास्त आप ओषधयः संतु सोम्यास्ता वित्यत्र

कुमारस्यनामसंबुध्यंतेननिर्दिश्य माघ्रायित्वाहस्तंप्रक्षाल्य· पुनस्तथैवगृहीत्वा· भुवस्त्वांत्वौषधीनां
रसं· इत्यादिपूर्ववत॥ पुनर्गृहीत्वा· स्वस्त्वांत्वौषधीनामित्यादिपूर्ववत॥३॥ पुनर्गृहीत्वाभूर्भुवस्वस्त्वांत्वौ
षधीनांरसमित्यादिपूर्ववतप्राशयेत॥४॥ ततः सर्वतः किंचित २ गृहीत्वाप्राशयित्वानागवल्लीदलंकिंचि
द्दत्वापुस्तकादिस्पर्शयित्वाब्राह्मणान्भोजयित्वाशिवोवाचयेत॥ ॥इतिविश्वप्रकाशेऽन्नप्राशनं॥अथ
वर्षानंतरंमार्कंडेयपूजा॥ मार्कंडेयमहाबाहोसप्तकल्पांतजीवन॥चिरंजीवीयथात्वंहिभविष्यामित
थामुने॥ अश्वत्थामाबलिर्व्यासोहनूमांश्चविभीषणः॥ कृपःपरशुरामश्चसप्तैतेचिरंजीविनः॥ सति
लंगुडसंमिश्रमंजल्यर्धमितंपयः॥मार्कंडेयमहाबाहोपिबाम्यायुःसमृद्धये॥ प्रथमतःपीठोपरि
अक्षतअष्टदलपुंजेषोडशोपचारैः आयुष्याभिवृद्ध्यर्थंपूजांकुर्यात॥गणपतिपूजास्वस्तिवाचनं

प॰ नंकुर्यात ॥ अथप्रार्थनमंत्रां ॥ नववर्षायुषंप्राप्यतपसामरूतापुरा ॥ सप्तकल्पांतिकल्पायुःप्राप्तंहिमुनिना
त्वया ॥ आयुर्देहियशोदेहिश्रियंदेहिधनंतथा ॥ पुत्रपौत्रप्रपौत्रांश्चमार्कंडेयमहामुने ॥ द्रोणपुत्रमहा
५ भागचंद्रतेजःसमुद्भव ॥ भेवायबलेहोमेत्वंअश्वत्थाम्ननमोस्तुते ॥ दैत्येंद्रकुलसंभूतबलेदाताहरेः
पुरा ॥ प्रपन्नाशरणंत्वांहिदीर्घमायुःप्रयच्छमे ॥ भविष्यंसांप्रतंचैवअतीतज्ञानवान्मुने ॥ नारायणस
मुद्भूतकृपींद्रसचिवोत्तम ॥ रामप्रियनमस्तुभ्यंहनूमन्रक्षसर्वदा ॥ बिभीषणनमस्तुभ्यंसमयेरामपूज
क ॥ आयुरारोगमैश्वर्यंदेहिपौलस्त्यनंदन ॥ द्विजेंद्रभरताचार्यसर्वशास्त्रविशारद ॥ शरण्यंत्वांप्रपन्नो
स्मिकृपायुश्चकृपाकुरु ॥ रेणुकेयमहावीर्यक्षात्रियान्वयनाशन ॥ आयुःप्रयच्छमेराजन्जामदग्न्यनमो
स्तुते ॥ ॥ इतिमार्कंडेयपूजाविधिः ॥ अथचौलकर्म ॥ जन्मनःप्रभृतितृतीयवर्षेयथाकुलधर्मंवानुस्

त्यपुनर्वसुकनक्षत्रे ज्योतिर्विदुक्तनक्षत्रेशुभलग्ने च चौलं कुर्यात्॥ पूर्वेद्युः पुण्याहं वाचयित्वा मंडपप्रतिष्ठा
मंकुरार्पणं विधाय चूडाकरणमारभ्य कार्यं चैवांकुरार्पणमित्युक्तत्वात्। अथ प्रोक्षणप्रतिसराख्यं कर्म
णा कृत्वा उडावास्नानं च विधाय· परेद्युरपि कुमारं दक्षिणत उपवेश्य प्राणानायम्य इमं कुमारं गार्भिक
वैजिकैनोनिर्हरणार्थं चौलेन कर्मणा संस्करिष्य इति संकल्प्य। ब्राह्मणभोजनाशीर्वचनकुमारभोजना
नि च कृत्वाग्नीधनादिपट्पात्रप्रयोगांते यवकुशान् तोयमोदककूपवृत्तालुलकम्पापिंजूलानदुदशाकृत्वा
कृत्यसीन्या व्रीन्नरतः सकृत्प्रयुंजात॥ प्रोक्षणसंस्काराद्याज्यभागांते। चौलादर्वाचीनकर्मलोपप्रेव
क्ष्यमाणपाहिन्नयोदशाहोमं कृत्वा प्रधानहोमं कुर्यात्। धाता ददातु नो रयिं सन श्रूर्णेमवावनत्स्वाहा
धात्र इदं।१। धाता प्रजाया उत॰ घृतवद्भिः धेम स्वाहा· धात्रे॰ धाता ददातु नो रयिं प्राची॰ सत्यराधसः स्व॰

·न·

२६

धात्रे·३। धाताददातु दाशुषे·सजोषास्वाहा·धात्रे·४। यस्त्वाहृदा·मश्याऽं स्वाहा·अग्नये·५ यस्मिन्त्वं·
तेस्वारित्स्वाहा·अग्नये·६ त्वेसुपुत्र·प्रातिरिच्यतेस्वाहा·इंद्राय·७ उकृत्कृथे·इवं तेस्वाहा·इंद्रायपु
त्रिणे·८ धाताददात्विति च तस्रभिः यस्त्वा हृदाकीरिणेति च तस्रभिः सीमंतवदित्य प्रावाज्याहुतीर्हुत्वा
समित्संनहनेहुत्वानुयाभ्यातानान्त्यस्तान् राष्ट्रभृतःश्च प्रायश्चित्ताहुतीश्च हुत्वाग्नेः पश्चात्कुमारं प्रा
ङ्मुखमुपवेश्य उष्णेन वाय उदकेनेह्यदितिः केशान्वपतु उत्प्लोदकं उद्गालोरकौ निनीय त्रेण्या शलल्या
त्रिभिर्दर्भपिंजूलैः शलालुग्लप्सेनेति केशान्कूर्मीविविधान्कृत्वा·आप उंदंतुजीवसे दीर्घायुत्वायवर्च
से। स्योकृचसूर्यं दृशेउल्पुदवेनग्निरउनात्तत्रीं स्वानदर्भानंतर्धाय। येनावपत्सविता क्षुरेण सोमस्य
राज्ञोवरुणस्य विद्वान्। तेनब्रह्माणोवपतेदमस्यायुष्मान् जरदष्टिर्यथासदयमसौमद्दैश्वर उ।

मोउलिपुरस्ताच्छिरः प्रवपेत। तान्केशान्दक्षिणतोमाताब्रह्मचारीवायवसाद्भिसहलपिंडमंजलौगृहीत्वा
तिष्ठेत्। यत्क्षुरेणमर्चयतासुपेशसावप्तावपसिकेशान्॥ शुंधिशिरोमास्यायुःप्रमोषीः॥ इतिस
र्वत्रवपंतमाचार्यमनुमंत्रयते॥ आचार्यस्तान्केशानंजलिस्थसहलपिंडेनिदधाति॥ दक्षंप्रक्षाल्य॥
पुनस्त्रीनदर्भानंतर्धाय। येनपूषाबृहस्पतेरग्नेरिंद्रस्यचायुषेवपत्॥ तेनास्यायुषेवपसौश्लोक्याय
यस्वस्तये॥ इतिदक्षिणकेशान्वापयित्वांजलौनिधाय। पुनस्त्रीनदर्भानंतर्धाय। येनभूयश्चरा
त्ययंज्योक्चपश्यातिसूर्यं॥ तेनास्यायुषेवपसौश्लोक्यायस्वस्तये॥ इतिपश्चात्केशानावपति॥ पु
नः येनपूषाबृहस्पतेरग्नेरिंद्रस्यचायुषेवपत्॥ तेनतेवपामिमद्दैश्वरशर्मन्नायुषावर्चसा
यथाज्योक्सुमनाअसः॥ इत्युत्तरतः केशान्वापयित्वांजलावश्वत्थपत्रेवानिक्षिपेत्।

·प· नानक्षुत्वाय केशान्वरुणस्य राज्ञो बृहस्पतिः सविता सोमो अग्निः। तेभ्यो निधानं बहुधान्वविंदन्नंतरा द्यावा
पृथिवी अपः सुवः। इत्युदुंबरमूले दर्भस्तंबे वा निदधाति ततः कुमारस्य शिरः प्रतिदिशं यथर्षि शिखानि
२७ दधाति। क्षुरं प्रक्षाल्य गूढं संस्थाप्य तेन अद्य कर्म निवृत्तिः। कुमारं स्नापयित्वा सदसीत्यादिभिः पूर्णपात्रमु
द्धृत्य कुमारस्यांजलौ निनीय ब्राह्मणेभ्यो वरं दत्वा ब्राह्मणान्भोजयित्वाशिषो वाचयेत॥ ॥अग्नीत्रनष्ठीपुरु
षोत्तमात्मजश्रीविश्वनाथेन विश्वप्रकाशाभिधपद्धतौ तत्तद्दिष्टं॥ इति चूडाकरणं॥ अथोपनयनमुच्यते
गर्भाधानादष्टमे जन्मादष्टमे वाब्दे ब्राह्मणमुपनीयत॥ तथा चापस्तंबः। गर्भाष्टमेषु ब्राह्मणमुपनयीत
गर्भैकादशेषु राजन्यं गर्भद्वादशेषु वैश्यमिति॥ तथा च याज्ञवल्क्यः। गर्भाष्टमेष्टमे वाब्दे ब्राह्मणस्योपना
यनं॥ राज्ञामेकादशे सैके विशामेके यथाकुलं॥ इति। काम्यकालस्तु वा। पंचमे विद्यापुत्रकामः षष्ठे तु धन

कामं: सप्तमे ब्रह्मवर्चसकामोऽष्टमे ह्यायुष्कामो नवमे तेजस्कामो दशमेऽन्नाद्यकाम एकादशे इंद्रियकामो
द्वादशे पशुकामः त्रयोदशे जयकामश्चतुर्दशे पौरुषकामः पंचदशे पूर्णकामः षोडशे राज्यकाम इति॥
तत्रैव तु नियमाः वसंते ब्राह्मणमुपनयीत। ग्रीष्मे राजन्यं शरदि वैश्यमिति। अथवा विमंव संतोक्षित
यं निदाघे वैश्याचनां तेप्रतिसंविदध्यात्॥ माघादिशुक्रांतिकपंचमासाः साधारणं वा सकलद्विजानां।
द्वादशाद्यां ततो मध्यफलमाद्युर्मनीषिणः॥ आतिषोडशिको विप्रो नोपनीयः कथंचनेति। उक्तं च। आषोड
शाद्द्वाविंशाच्चतुर्विंशाच्च वत्सरात्॥ ब्रह्मक्षत्रविशांकाल औपनायनिकः पर इति। अथापरो विशेषः
पंचस्वकाम्यकाल इति गलाषडशरग्रद्दणेऽधिकारीति चोक्तानंतरं समयप्राप्त्या ब्रह्मचराभ्यासेन
लोपनयनं कुर्यात्॥ तथा च। प्राप्ते तु पंचमे वर्षे ह्यप्रसुप्ते जनार्दने॥ उत्तरायणगे सूर्ये गुरौ शुक्रे च

कार्त्तिके। पूर्वाह्णे चैव शिष्याणां वर्णग्रहणमुत्तमं॥ अनध्यायान् पर्व षष्ठीं रिक्तां भौमशनी विना॥ दृश्य स्वा
त्योदितमित्र पौष्णार्द्रोत्तराश्विहस्तमृगा॥ सरस्वेषा रत्रान्यकेदिनलग्नांशकान्विना॥ चरे राशौ दयांशेषु
क्षेत्रं च द्रवे लेसति। शुभग्रहयुते केंद्रे लग्ने चाष्टमशुद्धिके॥ गुरुः स्मरगादि पंचके दृत्तृत्रिकोणेषु स्मृत्रिकेश्विने।
मित्रांत्यमूलपूर्वासु विद्यारंभः शुभे दिने॥ एवं सुनिश्चिते काले विद्यारंभं तु कारयेत्॥ अभ्यंगस्नानपूर्वं तु गं
धवस्त्रादिभूषितः॥ शुक्लवस्त्रं समास्तीर्य तंडुलैः प्रविलेखयेत्॥ शालाकया सुवर्णस्य पंचाशद्वर्णकान् क्र
मात्॥ प्रणवादिस्वाहांतैर्भिर्वर्णदेवान् प्रपूजयेत्॥ सरस्वतीं गणेशं च हरिं लक्ष्मीं गुरुं रविं॥ स्वसूत्रकारं स्वां
विद्यां शिवं चैव षडक्षरं। एतेषामेव देवानां नाम्नापि प्रजुहुयाद्धुतं॥ गुडौदनं दद्यात् कार्ये नैवेद्यं ग्रंथं पृथक् पृथ ११६
क्॥ पुण्याहं वाचयित्वादौ पूजयित्वा यथाविधिः॥ दक्षिणाभिर्द्विजेंद्राणां कर्त्तव्यं चात्र पूजनं॥ प्राङ्मुखो

गुरुरासीनोवरुणाननमुखंशिशुं॥ ॐ अविंदुमोंनमःशिवायवाचयित्वाषडक्षरं। आदिक्षांतंचपंचाशद्वर्णा
नध्यापयेच्छिशुं। प्राङ्मुखंतुततःकृत्वात्रिर्लेख्यंवाचयेत्ततं॥ ततःप्रणम्यसूर्यादीन्विप्रान्संतोष्यभूरिशः॥
लड्डुकाद्यैर्दक्षिणाभिर्विसर्जेद्देवतादिकान्॥ ॥इतिप्रसंगादक्षरस्वीकारउक्तः॥ अथप्रकृतमुपनयनं।
तत्राभ्युदयिककर्तव्यनियममाह। उपायनादिस्नानांतकर्मस्वभ्युदयक्रियां। पिताकुर्यात्तदूर्ध्वंतुपरिणेता
यथाविधि। नांदीश्राद्धंपिताकुर्यात्पुत्रीपुत्रविवाहयोः। उत्तरेष्वविवाहेषुस्वयंकुर्यात्तुनांदिकं॥ इतिविशे
षः। अपितृकस्यनांदीमुखकर्तव्यनियममाह। असगोत्रःसगोत्रोवायआचार्यउपानयत॥ तद्रोपनेयपित्रा
दीनुद्दिश्याभ्युदयंचरेत॥ कन्यायास्वाप्ययंमार्गोमुनिभिःपरिकीर्तितइति॥ उपनयनकर्तारस्तु॥ पित्रै
वोपनयेत्पुत्रांस्तदभावेपितुःपिता॥ तदभावेपितुर्भ्रातातदभावेतुसोदरइति। शरीरशुद्धिंप्रथमंगुरुः

ऋक्त्रयेणच॥ कृत्वाथशिष्यस्यपुनः कुर्याद्रुन्द्रेश्च संनिभौ॥ गायत्रीजपसाद्यं कृत्वाकृच्छ्रत्रिकं पुनः॥ अ
थाभ्युदयिकात्पूर्वदिनेपुण्याहंवाचयित्वास्यकुमारस्यपरश्वःक्रियमाणोपनयनांगभूतं अंकुरार्पणप्रो
क्षणप्रतिसरमंडपपूजनेउग्वाचननिमंत्रणादिकृत्वाद्वितीयदिनेमंगलस्नातोभूत्वामातृकापूजनाद्यर्थं
पुण्याहंवाचयित्वामातृकापूजनंकुलदेवतापूजनंनांदीमुखदेवतासमाराधनंब्राह्मणभोजनादीदच
नानिपूर्वोक्तानिसर्वाणिकुर्यात्॥ यद्विजातकर्मादीनिस्वस्वकालेनकृतानितदाइमंकुमारंजातकर्मनामकर
णान्नप्राशनचौलोपनयनाख्यैःकर्मभिःसंस्कारिष्यइतिसंकल्प्यअभ्युदयिकंविधायपाद्दित्रयोदश
होमंकृत्वोपनयनंकुर्यात्॥ तथाचस्मृतिसंग्रहे॥ गलेनुःक्रियमाणानांतत्रचमातृपूजनं॥ नांदीमुखं १२९
भवेदेकंहोममंत्राः ऋथकृऋथकृ॥ अथपाद्दित्रयोदशहोमः॥ प्राणानायस्य। अस्यकुमारस्यचौला.

र्वाचीनकर्मलोपेब्रह्मचारिणोगृहिणोवाव्रतलोपेसंध्यानित्यकर्मलोपेनवसस्यान्नाशनेआग्रयणम
कृत्वापाहित्रयोदशहोमंकुर्यात्॥तत्तत्कर्मलोपप्रायश्चित्तार्थंपाहित्रयोदशहोमंकरिष्यइतिसंकल्प्या
ग्निंप्रतिष्ठाप्यदर्व्याज्यस्थाल्यौप्रोक्षणस्रुवावित्याद्याज्यसंस्कारस्रुक्स्रुवसंमार्जनांतेग्निंपरिषिच्यस्रु
वाज्यंजुहुयात्॥स्रुवेणाज्यमादायस्रुचिंनिधाय·ॐभूरग्नयेचपृथिव्यैचमहतेचस्वाहा॥अग्नयेपृथि
व्यैमहतइदंनमम॥१॥भुवोवायवेचांतरिक्षायचमहतेचस्वाहा·वायवेअंतरिक्षायमहतेइदं०॥२॥सु
वरादित्यायचदिवेचमहतेचस्वाहा।आदित्यायदिवेमहतेइदं०॥३॥पाहिनोअग्नएनसेस्वाहा।अग्नयइ
०॥४॥पाहिनोविश्ववेदसेस्वाहा॥विश्ववेदसइदं०॥५॥यज्ञंपाहिविभावसोस्वाहा॥विभावसवइदं०
॥६॥सर्वंपाहिशतक्रतोस्वाहा॥शतक्रतवइदं०॥७॥पाहिनोअग्नएकयापाह्युतद्वितीयया॥पाहि

ऊर्जंतृतीययया॥ पाहिगीर्भिश्चतसृभिर्वसोस्वाहा॥ वसवेइदं॰ ८॥ पुनरूर्जानिवर्तस्वपुनरग्नइषायुषा
।पुनर्नःपाहिविश्वतःस्वाहा॥ अग्नयइदं॥ ९॥ सहरय्यानिवर्तस्वाग्नेपिन्वस्वधारया। विश्वप्स्न्याविश्व
तस्परिस्वाहा॥ अग्नयइदं॰॥१०॥ पुनः। भूरग्नयेचपृथिव्येचमहतेचस्वाहा॥११॥ भुवोवायवेचांतरि
क्षायचमहतेचस्वाहा॥१२॥ सुवरादित्यायचदिवेचमहतेचस्वाहा॥१३॥ इतिपूर्ववात्तिसृभिर्जुहोति
।इतित्रयोस्रुग्ण्याहुतीर्हुत्वापरिषिंचेत॥ तथाच।पुरस्तादुपरिष्टाच्चपाहितोमस्यसर्वदा।महाव्याहृ
तिकोहोमंकर्तव्यःस्मृतिशासनात्॥ ॥अनंतनक्षत्रपुरयोतमोयंश्रीविश्वनाथंश्रुतिकर्ममान्यः। १३०
विश्वप्रकाशाभिधपद्धतौततकृतावभूत्पापहापाहिहोमः॥इतिपाहित्रयोदशहोमः॥ अथोपन
यनविधिः॥ इतिपाहित्रयोदशहोमंकृत्वांतरितानिकर्माणिकुर्यात्॥ दक्षिणतउपवेश्यस्वयमुत्तरतः

आसीनः प्राणानायम्य एवं गुणविशेषणविशिष्टायां पुण्यतिथौ इमं मदेश्वरशर्माणं पूर्वेद्युः उपनयनं
वसंतेऽग्निं प्रतिष्ठाप्य कौपीनाछंनं कृ तद्दौ च कुमारं अभ्युदयिकं विधाय परेद्युराचार्यकुमारौ मंगलस्ना
तौ भूत्वा पुण्याहं वाचयिष्ये। कुमारं वेदपूर्वकसकलविद्याग्रहणयोग्यतासिध्यर्थमुपनेष्य इति संकल्प्य
अभ्युदयिकं कृत्वा कर्मणः पुण्याहं वाचयेत॥ कथं। सोदकं कलशं तं दलतांबूलयुक्तपात्रेणापिधायोषधी
षु प्रतिष्ठाप्य ब्राह्मणान् प्रार्थयेत। ॐ कर्मणः पुण्याहं भवंतो ब्रुवंत्विति ब्रूयात्तथा पुण्याहं कर्मणोस्त्वि
ति ब्रूयुरेवं त्रिः ॐ यत्पुण्यं नक्षत्रं। तानि वा एतानीति मंत्रद्वयं पठेयुः। ततः ॐ कर्मणः स्वस्ति भवंतो ब्रुवंत्विति
ब्रूयात्तेभ्यः ॐ स्वस्ति कर्मणोस्त्विति ब्रूयुः एवं त्रिः। स्वस्ति न इंद्रः। अप्रोऽरेवा इति पठेयुः। ततः ॐ कर्मण ऋ
र्द्धिं भवंतो ब्रुवंत्विति ब्रूयात्तेभ्यः कर्म ऋध्यतामिति ब्रुवते। ऋध्याम स्तोमैः। त्रीणि त्रीणि वै देवानामिति

च·प्र· पठेयुः॥ अथ मुखसमं कलशमुद्धरेत् ततः कलशोदकं कुमारस्यांजलौ स्वस्तिपुण्याहसमृद्धिरस्त्वित्यादिवा
क्यैर्निनयेत्। स्वस्तिपुण्याहसमृद्धिरस्तु· वर्षशतंपूर्णमस्तु· गोत्राभिवृद्धिरस्तु· शांतिपुष्टिश्चास्तु· शिव
१३१ शंभुश्चमस्तु· पुनरपिगोत्रब्राह्मणेभ्यः शुभंभवतु। यत्रयत्र आशिषोवाचयितेत्युक्तंतत्रतत्रकर्मणः पुण्या
हमेव। तथाच। आशीरितिच पुण्याहस्वस्त्यृद्धीतिसमृतंबुधैरिति॥ ततः कुमारस्याग्निसूत्रंप्रक्षिप्याचम्य॥
कुमारस्यायुष्याभिवृध्यर्थमिदंवाचयिष्यइत्युक्त्वा। इदंदेवद्धरितिजपित्वा· यज्ञोपवीतंपरमंपवित्रंप्र
जापतेर्यत्सहजंपुरस्तात्॥ आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तुतेजः॥ इतिकुमारंवाच
यित्वायज्ञोपवीतानिधायाच्चम्यनांदीमुखब्राह्मणान्भोजयित्वाकुमारंभोजयेत्॥ ततः आचमनांते
ऽग्नेरुत्तरतः शीतोष्णमादकश्चुरशलाकादर्भपिंजूलशलालुगलप्सयवान उदुहसदृत उदुंबरशाखाश्चप्रत्यं

स्यात्॥ उष्णेन वाय उदकेनेति यजुषा उष्णाः शीतास्वानीय आप उंदंतिनिशिरः उंदनं। त्रेण्याशलल्यात्रिभिर्द
र्भपिंजूलैः शलाकुग्ल्सेनेति· त्रीन्स्त्रीन्दर्भान्तर्धाय· येनावपदिति चतसृभिः। येनावपत। येनपूषा·
येनभूय: तेनपूषेति· प्रतिदिशं प्रतिमंत्रं प्रदक्षिणं प्रवपति प्रसावित्र प्रकुमारस्यनामाल्काग्रामीन्नातब्रू
यादेवं सर्वत्रायमसावपरति। दक्षिणतो माता ब्रह्मचारी वा युक्षुरेणे। तिग्मश्लीलाव पंतमनु मं त्र यं ते आ
नडुहसयवेसकृत्विंडकेशानुपयम्याप्लायकेशान्युदुंबरमूलदर्भस्तंबे वा ईशानदेशे निदधाति॥ सर्व
त्रोल्कचदाकेशानिधानात्समाने॥ तत्र सर्वत्रासावित्यनेन नामानि देशं करोति॥ तथा॥ नामनृयादसोऽ
स्वत्थमांतमुदागके॥ देवस्य त्वेत्यनुदात्तेच संबुध्यानामानिर्दिशेत॥ इति सम्यक्स्नापयित्वा। तांतमुप
वेश्याग्नींधनादिषट्पात्रप्रयोगं तेकुशांचकूर्चवस्वाश्मपलाशसमिद्द्राजिन मेखलाश्वसदंड गुंख्या

सर्वत्रमानुपपन्नाणि॥ ततः आज्यभागांते कुमारेण। आ गुर्दादिव्रजरसं गृणानो घृतप्रतीकः घृतर
योअग्ने॥ घृतंपिबन्नमृतंचारुगव्यंपितेवपुत्रंजरसेन येमं स्वाहा इतिपालाशीः समिधमाधाय॥
अग्नयेइदं आचार्योमंत्रमुक्त्वाबटुनास्वाहाकारेणहावयेत। आचार्यः। आतिष्ठेममश्मानमश्मेव
त्वंस्थिरोभव॥ अभितिष्ठपृतन्यतः सहस्वपृतनायतः॥ इत्यग्नेरुत्तरतः कुमारंदक्षिणेनपदाश्मानमा
स्थाप्य रेवतीस्त्वाव्यक्षिणन्कृत्तिकाश्चाकृतंस्त्वा॥ धियोवयन्नप्नोग्ना अवृंजनसहस्रमंताः अभि
तोअयजन्॥ देवीर्देवायपरिधीसवित्रेमहत्तदासामभवन्महित्वनं॥ इतिद्वाभ्यांवासोभिमंत्र्य। याअ ३३
कृंतन्नवयन्याअतन्वत याश्चदेवीरंतानभितोददंत॥ तास्त्वादेवीर्जरसेसंव्ययंत्वायुष्मानिदंपरिधत्स्ववासः
परिधत्तधत्तवाससैनं शतायुषं कृणुत दीर्घमायुः। बृहस्पतिः प्रायच्छद्वास एतत्सोमाय राज्ञे परि

धानवाउ। जरांगछासिपरिधत्स्ववासोभवाकृष्टीनामभिशस्तिपाव। शतंचजीवशरदःसुवर्चारायश्चपो
षमुपसंव्ययस्व। इतितिसृभिःपरिधाप्य॥परीदंवासोअधिधास्वस्तयेभूरापीनामभिशस्तिपावा। श
तंचजीवशरदःपुरूचीर्वसूनिचार्योविभजासिजीवन्॥इतिपरिहितमभिमंत्रयते॥इयंदुरुक्तात्परिबा
धमानानामेवर्णंपुनतीनआगात्॥प्राणापानाभ्यांबलमाभरंतीप्रियादेवानांसुभगामेखलेयं॥
ऋतस्यगोप्त्रीतपसःपरस्वीघ्नतीरक्षःसहमानाअरातीः।सानःसमंतमनुपरीहिभद्रयाभर्तारस्तेमेख
लेमारिषाम॥इतिद्वाभ्यांमौंजीमेखलांत्रिवृतांत्रिःप्रदक्षिणांपरिवीयकुमारंवाचयेत्॥मित्रस्यचक्षुर्ध
रुणंबलीयस्तेजोयशस्विस्थविरंसमिद्धं।अनाहनस्यंवसनंजरिष्णुपरीदंवाज्यजिनंदधेहं॥इत्येवंखंड
द्विखंडंत्रिखंडंवाअंगुलंचतुरंगुलंवाबहिर्दर्भमाजिनंप्रक्षिप्यवाचयेदुत्तरेणाग्निंप्रागग्रान्दर्भान्समं

स्तीर्यतेषुआगंतासमगन्महिप्रसूमर्त्यंयुयोतन॥अरिष्टाःसंचरेमहिस्वस्तिचरतादिहस्वस्त्यागृहे
भ्यः॥इतिकुमारमवस्थाप्यवाचयित्वोदकांजलिंआचार्यस्तस्यांजलावानीयताभिःसमुद्रादूर्मिमधुमां
उदारदुपांशुनासममृतत्वमश्यां॥इमेनुतेरश्मयःसूर्यस्ययेभिःसपित्वंपितरोनआयन॥इतिअंतो
क्ष्यवाचयेत।तथाचपूर्णाश्रमः।मौंज्याजिनावस्थापनप्राशणोक्षापनानितु॥समंत्रमेतान्याचार्यएवं
कृत्वाथवाचयेत॥कृष्णाजिनलक्षणमाह।अंगलंतुबाह्लीमयद्वास्याञ्चतुरंगुलं।एकखंडंद्विखंडंवाधा
रयेदुपवीतवदिति।आचार्यः अग्निष्टेहस्तमग्रभीत्सोमस्तेहस्तमग्रभीत्सवितातेहस्तमग्रभीत्स
रस्वतीतेहस्तमग्रभीत्पूषातेहस्तमग्रभीदर्यमातेहस्तमग्रभीदंशस्तेहस्तमग्रभीद्भगस्तेहस्तमग्र १३३
भीन्मित्रस्तेहस्तमग्रभीन्मित्रस्त्वमसिधर्मणाग्निराचार्यस्तव॥इतिदशभिःकुमारस्यदक्षिणंह

हस्तं गृहीत्वा अग्नये त्वा परिददाम्यसौ सोमाय त्वा परिददाम्यसौ॥ सवित्रे त्वा परिददाम्यसौ सरस्वत्यै त्वा परि
ददाम्यसौ मृत्यवे त्वा परिददाम्यसौ यमाय त्वा परिददाम्यसौ गदाय त्वा परिददाम्यसावन्तकाय त्वा परिद
दाम्यसावद्भ्यस्त्वा परिददाम्यसावोषधीभ्यस्त्वा परिददाम्यसौ पृथिव्यै त्वा सवैश्वानरायै परिददाम्यसाइ
ति प्रतिमन्त्रं देवताभ्यो रक्षणाय दत्त्वा असावित्यत्र संबुध्यन्तेन कुमारस्य नाम निर्देशः। यथा अमुकश
र्मन्निति। ततः समुहूर्ते आचार्यकुमारयोर्मध्ये नूतनपटान्तरितं कृत्वा पश्चाज्ज्योतिर्विदुक्तसमुहूर्ते देवस्य त्वा
सवितुः प्रसवे उपनये सौ। अमुकशर्मन्निति। यजुर्याकस्य पवेभ्यः सुप्रजाः प्रजया भूयाः सुवीरो वीरैः सु
वर्चा वर्चसा सुपोषः पोषैः। इति कुमारस्य दक्षिण कर्णे जपति। कुमारः ब्रह्मचर्यमागामुप मानयस्व देवे
न सावित्रा प्रसूतः। इति ब्रूयात्। आचार्यः। को नामासीत्युक्तः कुमारोमुकशर्मनामास्मीति ब्रूयात्॥

कस्यब्रह्मचार्यसीत्युक्तेप्राणस्यब्रह्मचार्यस्मीतिब्रूयात्॥आचार्योःमुकशर्मैषतेदेवसूर्यब्रह्मचारीतंगो
पाय।समामृतैषपतेसूर्यपुत्रःसदीर्घायुःसमामृत।याःस्वस्तिमग्निर्वायुःसूर्यश्चंद्रमाआपोनुसंचरंति
ताःस्वस्तिमनुसंचरासौअमुकशर्मन्॥नामध्वपतेश्रेष्ठस्याध्वनःपारमशीय·इतिकुमारंवाचयेत्।अथ
कुमारःस्रुचाज्यमादाय·ॐयोगेयोगेइतिप्रधानहोमंकुर्यात्।ॐयोगेयोगेतवस्तरंवाजेवाजेहवामहे·सखा
यइंद्रमूतये॥स्वाहा।इंद्रायेदं·आचार्यः।इममग्नआयुषेवर्चसेकृधिप्रियंरेतोवरुणसोमराजन्॥
मातेवास्माअदितेशर्मयच्छविश्वेदेवाजरदष्टिर्यथासत्स्वाहा॥अग्निवरुणसोमादितिविश्वेभ्योदेवेभ्यइदं·
मंत्रस्ययमुक्त्वाकुमारेणस्वाहाकारेणहावयेत्॥कुमारः॥शतमिन्नुशरदोअंतिदेवायत्रानश्चक्राजरसं १३४
तनूनां॥पुत्रासोयत्रपितरोभवंतिमानोमध्यारीरिषतायुर्गंतोःस्वाहा·देवेभ्यइदं·आचार्यःअग्नि

ष्ट आयुः प्रतरं दधात्वग्निष्टे पुष्टिं प्रतरां कृणोतु। इंद्रो मरुद्भिर्ऋतुधा कृणोत्वादित्यैस्ते वसुभिरादधातु
स्वाहा· स्वयमुक्त्वा स्वाहेति कुमारेण ह्रावयेत्॥ अग्नींद्रमरुदादित्यवसुभ्य इदं· अथ कुमारस्य। मेधां म अ
मंगिरसो मेधां सप्तऋषयो ददुः। मेधां मे प्रजापतिर्मेधामग्निर्ददातु मे स्वाहा· अंगिरःसप्तर्षिप्रजा
पत्यग्निभ्य इदं· अप्सरासु च या मेधा गंधर्वेषु च यद्यशः। दैवी या मानुषी मेधा सा मामाविशतादिह·
स्वाहा। मेधाया इदं· इमं मे वरुण॰ चके स्वाहा। वरुणायेदं· तत्त्वा यामि· प्रमोषीः स्वाहा· वरुणायेदं· त्वं नो
अग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमु
ग्ध्यस्मत्स्वाहा। अग्निवरुणाभ्यामिदं· स त्वं नो अग्नेवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ। अवय
क्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा· अग्निवरुणाभ्यामिदं· त्वमग्ने अयास्यया

सन्मनसाहूतः। अया मन्द्र्यमूर्द्धिषेयानो धेहि भेषजं स्वाहा॥ अग्नये अयसे इदं॥ ११॥ तथा। होव
येद्योगदुल्याचैव दुमेकादशाहुतीः। द्वितीयां च चतुर्थीं च स्वयमुत्थाय होमयेत्॥ तथा देवतानुक्रमणिका
यां उद्देशात्यागकारिका। योगाउ द्रो द्वितीयाग्निर्वरुणा सोममुच्यते। अदितिश्च तथा विश्वेदेवाः सर्वोप
देवताः॥ त्वाल्लमित्यत्र देवाः स्युरग्निरित्यत्र देवताः। अग्नींद्रौ मरुतश्चैव आदित्या वसवस्तथा॥ मेधाम
ह्यमित्यस्मिन् मंत्रे स्युर्देवता इमाः। पुत्रश्चांगिरसः सप्तऋषयश्च प्रजापतिः। अग्निश्चैवाप्सरेत्यत्र मे
धाचित दनंतरं॥ वरुणा मंत्र ऐमंत्र युग्मे तत्र रतोद्रयोः। अग्निश्च वरुणश्चैव लमग्नेग्निः नकीर्तितइति। २३५
समिधामिध्मसनहनं चाग्नौ प्रहृत्य। ततः आचार्योस्त्रियादीन् जुहुयात्। ततः कुमारोग्नेः पश्चात्कुशान्
यभिः कुशैर्निर्मितं सूत्रेण परिवातं कूर्चं निदधाति। तत्र गुरुः। शिष्यः दर्भ्याचार्यासंदीमाल्यचार्घ॥

इति उदगग्रेषु कूर्चे उपविशेत्॥ कुमारः आचार्यं पुरस्तात्प्रत्यङ्मुख उपविश्याचार्यस्य दक्षिणं पादं गृहीत्वा सा
वित्रीं भो अनुब्रूहीति तस्मा अन्वाह गुरुः उभयोस्तानिनूतनवस्त्रावरणं कृत्वा तां प्रत्येकं व्याहृतिभिः सार्कं पच्छो
ऽर्धर्चशोनवानक्रमेणापदिशेत्। यथा। ॐ भूः तत्सवितुर्वरेण्यं। ॐ भुवः भर्गो देवस्य धीमहि। ॐ सुवः धि
यो यो नः प्रचोदयात्॥ पुनः ॐ भूः तत्सवितुर्वरेणियं भर्गो देवस्य धीमहि॥ ॐ भुवः धियो यो नः प्रचोदया
त्। ॐ सुवः तत्सवितुर्वणियं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्॥ पुनः ॐ भूर्भुवः सुवः तत्सवितु
रित्यादिमन्त्रः इति पच्छोऽर्धर्चशः। सर्वो व्याहृतीर्विहृताः पादादिषु दद्यात् पुनरर्धर्चादौ द्वे उत्तमां कृत्स्नादौ त्रि
र्भूयात्। तथा। तां पच्छोऽर्धर्चशः सर्वो व्याहृतीर्व्याहृतीः क्रमात्॥ पदेष्वर्धर्चयोरादौ कृत्स्नायामुत्तमां वदे
दिति। अथ कुमारः। ब्रह्म धमसो सोम्य प्राणस्त्वं मे गोपाय इति स्वमुत्तरमोष्ठं श्यावान्तमुपस्पृश्याचम्य

ब्रह्मण आणीस्थः इतियुगपत्कराभ्यां स्वकर्णावुपस्पृश्याचम्य सुश्रवः सुश्रवसंमाकुरु यथात्वंसुश्रवः सुश्र
वा अस्येवमहं सुश्रवः सुश्रवाभूयासंयथात्वं सुश्रवो देवानांनिधिगोपोस्येवमहंब्राह्मणानांब्रह्मणो
निधिगोपो भूयासं ॥ इतिपालाशंदंडंदक्षिणेनहस्तेनादत्ते ॥ ततःस्मृतंचमेस्मृतंचमेतन्मउभयंव्रतं ॥ निं
दाच मेनिंदाच मेतन्मउभयंव्रतं । श्रद्धाच मे २ तन्मउ० ॥ विद्याच मे २ तन्मउभयं० ॥ श्रुतंचमे २ तन्मउभ०
सत्यंच मेनृतंचमेतन्मउभयंव्रतं ॥ तपश्चमेतपश्चमेतन्मउभयंव्रतं ॥ व्रतंचमेव्रतंचमेतन्मउभयंव्रतं ॥ य
द्ब्राह्मणानांब्रह्मणिव्रतं ॥ यदग्नेःसेंद्रस्यसप्रजापतिकस्य सदेवस्यसदेवराजस्यसमनुष्यस्यसमनुष्यरा १३६
जस्यसपितृकस्यसपितृराजस्यसगंधर्वाप्सरकस्य ॥ यन्मआत्मनआत्मनिव्रतं ॥ तेनाहंसर्वव्रतोभूया
सं ॥ इतिकुमारंवाचयेत ॥ गुरोवरंतेददामीतिगुरवेवदुर्वरंदद्यात ॥ गुरुः सप्तदशाहुत्योपान्यात ॥ देवस्य

त्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामि॥राजात्वावरुणोनयतुदेविदक्षिणेरुद्राय
गां।तेनामृतत्वमश्यांवयोदात्रे॥मयोमह्यमस्तुप्रतिग्रहीत्रे॥कइदंकस्माअदात्।कामःकामायकामो
दाताकामःप्रतिग्रहीताकामंसमुद्रमाविशकामेनत्वाप्रतिगृह्णामिकामैतत्तेएषातेकामदक्षिणा॥
उत्तानस्त्वांगीरसःप्रतिगृह्णातु॥सोमायवासः।रुद्रायगां॥इतिधेनुंप्रतिगृह्य।उदायुषास्वायुषोदो
षधीनांरसेनोत्पर्जन्यस्यशुष्मेणोदस्थाममृतांअनु॥इतिवटुमुत्थाप्यवाचयति।तच्चक्षुर्देवहि
तंपुरस्ताच्छुक्रमुच्चरत्॥पश्येमशरदःशतंजीवेमशरदःशतंनंदामशरदःशतंमोदामशरदःशतंभ
वामशरदःशतंशृणवामशरदःशतंप्रब्रवामशरदःशतमजीताःस्यामशरदःशतंज्योक्चसूर्यंदृशे
।यउदगान्महतोर्णवात्विभ्राजमानःसलिलस्यमध्यात्समावृषभोलोहिताक्षः।सूर्योविपश्चिन्

मनसापुनातु॰यस्मिन्भूतंचभव्यंचसर्वेलोकाःसमाहिताः।तेनगृह्णामित्वामहंमह्यंगृह्णामित्वामहंप्रजा
पतिनात्वामह्यंगृह्णाम्यसौ॥इतिवधूमादित्यमुपस्थाप्योपविश्यततःपरिधीनपसार्य।अनाम्नातादिप्राय
श्चित्ताहुतीर्हुत्वोत्तरपरिषेचनपूर्णपात्रासनान्तंकृत्वाअग्निकार्यंकुर्यात्॥प्राणानायम्याग्निकार्यंकरि
ष्यइतिसंकल्प्याग्निंपरित्वेतिपरिस्तीर्य॰परित्वाग्नेपरिस्तृणाम्यायुषाचधनेनचसुप्रजाःप्रजसुश्रवांभूया
संयथात्वंसुश्रवादेवानांनिधिगोपोस्येवमहंब्राह्मणानांब्रह्मणोनिधिगोपोभूयासं(त्व)याभूयासंसु
वीरोवीरैःसुवर्चावर्चसासुपोषःपोषैःसुगृहोगृहैःसुपतिःपत्यासुमेधामेधयासुब्रह्माब्रह्मचारिभिः २३७
इतिपरिस्तीर्य॥अदितेनुमन्यस्वेतिदक्षिणतःप्राचीनमनुमतेनुमन्यस्वेतिपश्चादुदीचीनंसरस्वत्यनु
मन्यस्वेतिउत्तरतःप्राचीनंदेवसवितःप्रसुवेतिसमन्तंइतिपरिषिच्य।अग्नयेसमिधमाहार्षंबृहतेजातवेदसे।

यथात्वमग्नेसमिधासमिध्यसएवंमामायुषावर्चसासन्यामेधयाप्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येनसमेध
यस्वाहा।अग्नयइदं॰१॥एधोस्येधिषीमहिस्वाहा।अग्नयइदं॰२॥समिदसिसमेधिषीमहिस्वाहा॰अग्नय
इदं॰३॥तेजोसितेजोमयिधेहिस्वाहा॰अग्नय॰४॥आपोअद्यान्वचारिषंरसेनसमसृक्ष्महि।पयस्वां
अग्नआगमंतंमासंसृजवर्चसास्वाहा।अग्नयइ॰५॥संमाग्नेवर्चसासृजप्रजयाचधनेनचस्वाहा।अ
ग्नयइदं॰६॥विद्युन्मेअस्यदेवाइंद्रोविद्यात्सहऋषिभिःस्वाहा॰इंद्रायेदं॰७॥अग्नयेबृहतेनाकायस्वा
हा॰अग्नयेबृहतेनाकायेदं॰८॥द्यावापृथिवीभ्यांस्वाहा।द्यावापृथिवीभ्यांइ॰९॥एषातेअग्नेस
मित्तयावर्धस्वचाप्यायस्वचतयाहंवर्धमानोभूयासमाप्यायमानश्चस्वाहा॰अग्नयइ॰१०।योमा
ग्नेभागिनंसंतमथाभागंचिकीर्षति।अभागमग्नेतंकुरुमामग्नेभागिनंकुरुस्वाहा।अग्नयइ॰११।

समिधमाधाय्याग्नेसर्वव्रतोभूयासंस्वाहा। अग्नयइ०१२॥ भूःस्वाहा। अग्नय०१३। भुवःस्वाहा० वायवइ
०१४॥ सुवःस्वाहा। सूर्यायइ०१५॥ भूर्भुवःसुवःस्वाहा० प्रजापतय०१६॥ इतिषोडशसमिधोहुत्वा० अदिते
न्वमंस्थाइति। प्रासार्चारित्युत्तरंपरिषिच्य० यत्ते अग्नेतेजस्तेनाहंतेजस्वीभूयासंयत्ते अग्नेवर्चस्तेना
हंवर्चस्वीभूयासंयत्तेअग्नेहरस्तेनाहंहरस्वीभूयासं॥ मयिमेधांमयिप्रज्ञांमय्यग्निस्तेजोदधातुम
यिमेधांमयिप्रज्ञांमयींद्रइंद्रियंदधातुमयिमेधांमयिप्रज्ञांमयिसूर्योभ्राजोदधातु॥ इत्यग्निमुपस्था
योपविश्य। मानस्तोकेतनयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः। वीरान्मानोरुद्रभामितो २३
वधीर्हविष्मंतोनमसाविधेमते॥ इतिजपित्वाकांचिदुत्तरदिग्भस्मअनामिकयांगुल्यागृहीत्वा। मेधा
वीभूयासंइतिललाटदत्वातेजस्वीभूयासंदक्षिणांसे। वर्चस्वीभूयासं। वामांसे। ब्रह्मवर्चसीभूयासं।

दक्षिणस्तने। आयुष्मानभूयासं नाभौ। अंनादो भूयासं कंठे। यशस्वी भूयासं इति ग्रीवायां। सर्वसम
ध्धो भूयासमिति शिरसि ध्धत्वा॥ ततश्चैकां समिधं गृहीत्वा। पुनस्त्वादित्यारुद्रा वसवः समिंधतां पुनर्ब्रह्मा
णो वसुनीथयज्ञैः॥ घृतेन त्वं तनुवो वर्धयस्व सत्याः संतु यजमानस्य कामाः स्वाहा॥ वसुभ्यो रुद्रेभ्य आ
दित्येभ्यः इदं० २७॥ इति आधाय एवं सप्तदश समिधो हुत्वा। स्वस्ति श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं
श्रियं बलं। आयुष्यं तेज आरोग्यं देहि मे हव्यवाहन। इत्यग्निं प्रार्थ्य। यस्य स्मृत्या च नामोक्त्या तपोयज्ञ
क्रियादिषु॥ न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतं। मंत्रहीनं क्रियाहीनं भक्तिहीनं हुताशन॥ यद्धुतं तु
मया देव परिपूर्णं तदस्तु मे॥ चतुःसागरपर्यंतं गोब्राह्मणेभ्यः शुभं भवतु॥ इति प्रार्थ्य स्वगोत्र गुर्वादीन्
त्वा नमस्कुर्यात्॥ ततः आचार्यो ब्रह्मचार्यसि। अपोशान। कर्म कुरु। दिवामासुषुप्थाः। भिक्षाचर्यं चर॥

आचार्याधीनो भव। इत्युक्ते प्रतिवचने कुमारोऽपि वदेत्। प्रथमे त्वस्मीति। अशानि। करवाणि। दिवानस्वाप
मि। चराणि। भवानि। इति ब्रूयात्॥ अश्लणेन रंददामीति अश्लाणं विसर्जयेत्॥ ततो गुरुं मातरमाचार्यं
अन्यांश्च वृक्षान्नमस्कृत्य भिक्षां याचेत॥ भवान्भिक्षां ददात्विति पुरुषं भवति भिक्षां देहीति स्त्रियं। आ
दिमध्यावसानेषु भवच्छब्दोपलक्षिता॥ ब्राह्मणक्षत्रियविशां भैक्षचर्यां यथाक्रममिति॥ आदूमेनमग्निं
धारयन्नक्षारलवणं भुंजीत चतुर्थेऽह्नि पालाशं कृत्वा गुरुर्वा सोऽन्यत्परिधाय्य॥ यस्य ते प्रथमवास्यं
हराम· स्तं त्वा विश्वे अवंतु देवाः॥ तं त्वा भ्रातरः॥ सुवृधा वर्धमानमनुजायंतां बहवः सुजाता। इति पुंध १३९
तवाससी गृहीत्वा याज्ञिकाय ब्राह्मणाय प्रयच्छेत्॥ ॥इत्युपनयनं समाप्तं॥ अथ चतुर्थेऽह्नि पालाशं
कर्म कुर्वन्। ग्रामात्प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य गृह्य पालाशशाखां प्रतिष्ठाप्य पलाशस्याध

स्नात्वा स्थंडिलं कृत्वा तत्रोपनयनाग्निं प्रतिष्ठाप्य कर्मणः पुण्याहं वाचयित्वाभ्युदयिकं विधाय गणेशवरुणौ सं
पूज्य प्राणानायम्यातिथ्युल्लेखनांते अस्य कुमारस्य मेधाजननार्थं मेधाजननाख्यं पालाशं कर्म करिष्य इति सं
कल्प्याग्नेरुत्तरतः प्रागपवर्गाणि चतुरस्राणि स्थंडिलानि तंडुलैर्दशमात्राणि त्र्यंगुलोत्सेधानि कृत्वा पला
शमूले च तथैव तंडुलैः स्थंडिलं विधाय तेषु स्थंडिलेषु चतुर्ष्वपि प्रत्यगारभ्य प्रणवश्रद्धामेधाब्रह्मदेवताः
पूजयेत्॥ यथ मंत्राहूतिरुक्ता प्रणवाय नमः॥ मध्ये श्रद्धायै नमः। तृतीये मेधायै नमः। चतुर्थे पालाशे
स्थंडिले ब्रह्मणे नमः। इति षोडशोपचारैरभ्यर्च्य उपतिष्ठेत॥ ॐ यश्छंदसामृषभो विश्वरूपः। छंदोभ्या
ध्यमृतात्संबभूव॥ स मेंद्रो मेधया स्पृणोतु। अमृतस्य देव धारणो भूयासं। शरीरं मे विचर्षणं। जिह्वा
मे मधुमत्तमं। कर्णाभ्यां भूरि विश्रुवं। ब्रह्मणः कोशोसि मेधया पिहितः। श्रुतं मे गोपाय। इति नवभि

र्वाक्ये: प्रणवमुपस्थाय। श्रद्धयाग्निः समिध्यते। श्रद्धया विंदते हविः। श्रद्धां भगस्य मूर्धनि। वचसा वे
दयामसि। प्रियं श्रद्धे ददतः। प्रियं श्रद्धे दिदासतः। प्रियं भोजेषु यज्वसु। इदं म उदितं कृधि। यथा दे
वा असुरेषु। श्रद्धामुग्रेषु चक्रिरे। एवं भोजेषु यज्वसु। अस्माकमुदितं कृधि। श्रद्धां देवा यजमानाः
वायुगोपा उपासते। श्रद्धां हृदय्ययाकूत्या। श्रद्धया हूयते हविः। श्रद्धां प्रातर्हवामहे। श्रद्धां म
ध्यंदिनं परि। श्रद्धां सूर्यस्य निम्रुचि। श्रद्धे श्रद्धापयेह मा। श्रद्धा देवानधिवस्ते॥ श्रद्धा विश्वमि
दं जगत्। श्रद्धां कामस्य मातरं॥ हविषा वर्धयामसि। इति श्रद्धामुपस्थाय॥ ॐ मेधा देवी जुषमाणा न १५०
आगात् विश्वाची भद्रा सुमनस्यमाना॥ त्वया जुष्टा नुदमाना दुरुक्तान् बृहद्वदेम विदथे सुवीराः॥ त्वया जु
ष्ट ऋषिर्भवति देवि त्वया ब्रह्मागतश्रीरुत त्वया॥ त्वया जुष्टश्चित्रं विन्दते वसु सा नो जुषस्व द्रविणो

नमेधे।मेधांमइंद्रोदधातुमेधांदेवीसरस्वती॥मेधांमेअश्विनावुभावाधत्तांपुष्करस्रजा।अप्सरासुच
यामेधागंधर्वेषुचयन्मनः।दैवीमेधासरस्वतीसामांमेधासुरभिर्जुषतांस्वाहा॥आमांमेधासुरभि
र्विश्वरूपाहिरण्यवर्णाजगतीजगम्या।ऊर्जस्वतीपयसापिन्वमानासामांमेधासुप्रतीकाजुषतां।
मयिमेधामितिचपठित्वामेधामुपस्थाय॥ॐब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआव
ःसबुध्नियाउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः।इतिब्रह्माणमुपस्थायाथदधिमधु
शर्कराभिःप्रणवादीनुद्दिश्यान्नमधुरेणब्राह्मणान्भोजयित्वा।इतिसंकल्प्याग्निंधनाद्याज्यभा
गांतेवाससीमेखलाजिनदंडांश्चसरूपयुंज्यसमंतादूपेरग्निंपरिश्रित्यस्रुवाज्यमादाय।ॐ

यः छंदसामृषभोविश्वरूपः। छंदोभ्योध्यमृतात्संबभूव॥ समेंद्रोमेधयास्पृणोतु। अमृतस्यदेव धारणो
भूयासं। स्वाहा। छंदोभ्यः ०१ शरीरंमेविचर्षणं। जिह्वामेमधुमत्तमं। कर्णाभ्यांभूरिविश्रुवं। ब्रह्मणः
कोशोसिमेधयापिहितः। श्रुतंमेगोपायस्वा० छंदोभ्यः० २ आवहंतीवितन्वाना॥ कुर्वाणाचीरमात्मनः
वासांसिममगावश्च अंनपानेचसर्वदा। ततोमेश्रियमावह। लोमशांपशुभिःसह। स्वाहा। छंदोभ्य
३० ३॥ आमायंतुब्रह्मचारिणःस्वाहा। छंदोभ्य० ४॥ यशोजनेसानिःस्वाहा० छंदोभ्यः० ५॥ श्रेयान्वस्य
सोसानिस्वाहा। छंदोभ्यः० ६॥ तंत्वाभगप्रविशानिस्वाहा॥ छंदोभ्यः० ७॥ समाभगप्रविशःस्वा०
छंदोभ्यः० ८॥ तस्मिन्सहस्रशाखेनिभगाहंत्वयिमृजेस्वा० छंदोभ्यः० ९॥ यथापःप्रवतायंतिय १४
थामासाअहर्जरं॥ एवंमांब्रह्मचारिणः। धातरायंतुसर्वतःस्वाहा॥ छंदोभ्यः १०॥ प्रतिवेशोसिप्रमा

वेदव्रतानि॥आचार्यकुमारौमंगलस्नातौभूत्वान्यस्यभद्रासनेोपविश्यप्राणानायम्यमंकुमारंप्राजाप
त्यव्रतेनकर्मणासंस्करिष्य इतिसंकल्प्यब्रह्मचारिणोवपनंकारयित्वापाककर्मवत्स्नानविधिनास्नात्वा।
प्रजापतिंकांडर्षिःसांहितीर्देवतायाज्ञिकीर्देवतावारुणीर्देवताइत्युपनिषत्तत्रयंब्रह्माणंस्वयंभुवंसद
सस्पतिंचेतिषट्‌ऋषीनन्वर्यातितोऽर्चयेत्।तर्पणंचकृत्वागृह्यमांगल्यपुण्याहंवाचयित्वाग्निंप्रतिष्ठाप्यपुष
ष्पाद्यप्रयोगाद्यग्निमुखांतेस्नुचाप्रधानहोमंकुर्यात्।ॐप्रजापतयेकांडऋषयेस्वाहा।प्रजापतये
कांडऋषायेदं।१।प्रजापतेनत्वदेता० णा०स्वा०प्रजापतयेइदं०॥२॥रयीणांपतिंयजतंबृहंतं।अस्मिन्
भरेनृतमंवाजसातौ।प्रजापतिंप्रथमजामृतस्य।यजामदेवमधिनोब्रवीतुस्वाहा।प्रजापतये०॥३॥
प्रजापतेत्वांनिधिपाःपुराणां।पातुर्विश्वस्यजगतःपरस्पाः।हविर्नोदेवविहवेजुषस्वस्वाहा॥प्रजाप०४॥

नवेमेलोकाः प्रदिशोदिशश्च। परावतो निवत उद्वतश्च। प्रजापते विश्वसृग्जीवधन्यः इमं नो देव प्रतिहर्य
हर्यं स्वाहा॥ प्रजापतये०॥५॥ प्रजापतिं प्रथमं यज्ञियानां॥ देवानामग्रे यजतं यजध्वं। सनो ददातु द्रवि
णं सुवीर्यं॥ रायस्पोषं विष्यतु नाभिमस्मे स्वाहा॥ प्रजापत०॥६॥ योरायईशे शतदाय उक्थ्यः। यः पशू
नां रक्षिता विष्ठितानां॥ प्रजापतिः प्रथमजा ऋतस्य। सहस्रधामा जुषतां हविर्नः स्वाहा। प्रजापतये
०॥७॥ सांहितीभ्यो देवताभ्यो उपनिषद्भ्यः स्वाहा। सांहिताभ्यो०॥८॥ याज्ञिकीभ्यो देवताभ्यो उपनिषद्भ्यः
स्वाहा। याज्ञिकीभ्यो०॥९॥ वारुणीभ्यो देवताभ्यो उपनिषद्भ्यः स्वाहा। वारुणी०॥१०॥ ब्रह्मणे स्वयंभु
वे स्वाहा। ब्रह्मणे०।११। सदसस्पतये स्वाहा। सदसस्पतये०।१२॥ सदसस्पतिमद्भुतं प्रियमिंद्रस्य काम्यं
।सनिं मेधामयासिषं स्वाहा॥ सदसस्पतये०॥१३॥ इति त्रयोदशाज्याहुतीर्हुत्वा समित्संनहनेन जुहुयात्। 

ततो ब्रह्मचारी अग्ने व्रतपते काण्डर्षिभ्यः प्राजापत्यव्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां। वायो व्रतपते काण्ड
र्षिभ्यः प्राजापत्यव्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां। आदित्य व्रतपते काण्डर्षिभ्यः प्राजापत्यव्रतं०
राध्यतां॥ व्रतानां व्रतपते काण्डर्षिभ्यः प्राजापत्यव्रतं० राध्यतां ।४॥ इत्यग्निमुपतिष्ठते। ततो जया
दिव्यस्तराष्ट्रभृत ब्रह्मविसर्जनान्तं कृत्वाभ्युदयिकं कुर्यात्॥ ॥इति प्राजापत्यव्रतं॥ अथ एवमेव प्राजा
पत्यव्रतोत्सर्जनं॥ तत्र कुमारं प्राजापत्यव्रतोत्सर्जनेन संस्करिष्यामि इति संकल्प्य। संवत्सरान्ते तस्मिन्नग्निवास्ता
नन्वाध्य चं न होमान् पूर्ववत्कृत्वोपस्थाने न विशेषः ततो ब्रह्मचारी। अग्ने व्रतपते काण्डर्षिभ्यः प्राजापत्यव्र
तमचारिषं॥ तदशकं तन्मे राधि॥१॥ वायो व्रतपते काण्डर्षिभ्यः प्राजापत्यव्रतमचारिषं। तदशकं०
२॥ आदित्य व्रतपते काण्डर्षिभ्यः प्राजाप० तदशकं तन्मे राधि॥३॥ व्रतानां व्रतपते काण्डर्षिभ्यः प्रा०

नदद्यकं तन्नो राधि ॥४॥ इत्युपस्थाय तत्पादित्यातत्त्वभ्य तत्रप्लावि सतेनां तं कृत्वाभ्युदयिकं कुर्यात् ॥ ॥
इति प्राजापत्यव्रतोत्सर्जनं ॥ अथ सौम्यव्रतं ॥ तत्रोदगयने पर्वणि वा रौद्रपर्व कृत्वा ग्रामाद्बहिः स समीपे
जलाशये कुर्यात् ॥ तत्र प्रयोगः ॥ आचार्यः कुमारं दक्षिणत उपवेश्य स्वयमुत्तरत आसीनः प्राणानायम्य
मं कुमारं सौम्यव्रतेन संस्करिष्यामि इति संकल्प्य पूर्ववत् स्नानविधिना स्नात्वा ॥ सोमं काण्डर्षिं सांहितीर्देवता
उपनिषदः ॥ याज्ञिकीर्देवता उपनिषदः ॥ वारुणीर्देवता उपनिषदः ॥ ब्राह्मणं स्वयंभुवं ॥ सदसस्पतिं
चावयाह्वग ध्यादिभिरभ्यर्च्य कुमारेण पूर्ववत् स्नानतर्पणादि कारयित्वा ॥ अग्निप्रतिष्ठापनादि पा
त्रप्रयोगान्ते उपस्थाय दर्वीं तस्य औदुंबरसमिधो नूतनवस्त्रं च सह तत्प्रयुज्य सोमाग्नी संस्कारान्वाग्निमुखां २४९
ते ॥ सोमाय काण्डर्षये स्वाहा ॥ सोमऋषये ॥ १ ॥ सोमो धेनुं सोमो अर्वन्तमाशुं सोमो वीरं कर्मण्यं ददातु ॥

सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै स्वाहा॥ सोमाय २॥ आषाढं युत्सु पृतनासु पप्रिं।
स्वर्षामप्सां वृजनस्य गोपां॥ भरेषुजां सुक्षितिं सुश्रवसं॥ जयन्तं त्वामनु मदेम सोम स्वाहा। सोमा
य ३॥ त्वं सोम क्रतुभिः सुक्रतुर्भूः। त्वं दक्षैः सुदक्षो विश्ववेदाः॥ त्वं वृषा वृषत्वेभिर्महित्वा॥ द्युम्नेभिर्द्यु
म्न्यभवो नृचक्षाः स्वाहा। सोमाय॥ ४॥ या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञं।
गयस्फानः प्रतरणः सुवीरः॥ अवीरहा प्रचरा सोम दुर्यान् स्वाहा॥ सोमाय ५॥ त्वमिमा ओष
धीः सोम विश्वाः। त्वमपो अजनयस्त्वं गाः। त्वमाततन्थोर्वन्तरिक्षं॥ त्वं ज्योतिषा वि तमो ववर्थ स्वा
हा। सोमाय ६॥ या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु॥ तेभिर्नो विश्वैः सुमना अ
हेळन् राजन्त्सोम प्रति हव्या गृभाय स्वाहा॥ सोमाय ७॥ सांहिताभ्यो देवताभ्य उपनिषद्भ्यः स्वा

सांहितीभ्यो०१८॥ याज्ञिकीभ्यो दे०१९॥ वारुणीभ्यो दे०॥२०॥ ब्रह्मणेस्वयंभुवे॥२१॥ सदसस्पतये०॥२२॥
सदसस्पतिमद्भुतं॥२३॥ इति त्रयोविंशत्याहुती र्हुत्वा· ब्रह्मचारी इमा दक्षमुपस्थाय। न मोवार्वेइति
शांत्यनुवाकेन शांतिंकृत्वा· कुमारमुत्थाय चलस्यओ दुंबरीः समिध आदाय घृतेनाक्त्वा॥ ॐ पृथि
वीसमित्। तामग्निः समिंधे। साग्निंसमिंधे॥ तामहंसमिंधे॥ सामासमिध्वा॥ आयुषातेज
सा। वर्चसाश्रिया। यशसाब्रह्मवर्चसेन॥ अन्नाद्येन समिंधतां स्वाहा॥ पृथिव्या इदं०॥१॥ अं
तरिक्षं समित्। तांवायुः समिंधे॥ सावायुंसमिंधे। तामहंसमिंधे। सामासमिद्ध। आयुषा
तेजसा वर्चसाश्रिया॥ यशसाब्रह्मवर्चसेन। अंनाद्येनसमिंधतांस्वाहा॥ वायवे०॥२॥ द्यौस्स १५०
मित्। तामादित्यः समिंधे॥ सादित्यंसमिंधे। तामहंसमिंधे॥ इ पंपूर्ववत्। सा·आ·व·य·॥

आदित्याय॰ ३॥ प्राजापत्यामे समित्यः समिंधे। सादित्यँ समिंधे। तामहं समिंधे॥ शेषं पूर्ववत्।
सा॰ आदसि सपत्नक्षयिणि। भ्रातृव्यहा मे ऽसि स्वाहा॥ प्रजापत॰ ५॥ इति चतस्रः समिधो ऽग्नावा
धाय॥ अग्ने व्रतपते काण्डर्षिभ्यः सौम्यव्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां। वायो व्रतपते॰
काण्डर्षिभ्यः सौम्यव्रतं॰ तच्छकेयं॰ आदित्य व्रतपते काण्डर्षिभ्यः सौम्य॰ तच्छकेयं॥ व्रतानां व्रत
पते काण्डर्षिभ्यः सौम्यव्रतं॰॥ इत्यग्निमुपतिष्ठते॥ अथाचार्यः ॐ युंजते मनः। दस्मो अश्वस्यनि
ष्पदसि। ब्रह्म प्रवर्ग्येण प्रचरिष्यामः। दस्राप्राशी॥ अपश्यं गोपामभिपद्यमानं। देवस्यत्वा॰ स
मुद्राय त्वा॰ इषपीपिहि॥ धर्मयाते। देवावेसत्वं। परिश्रिते। ब्रह्मन्प्रचरिष्यामः॥ अग्निष्ट्वा वसु
भिः॥ त्रिंशद्वा एत यज्ञस्य। देवस्य। विश्वा आशा॥ धर्मयाते। प्रजापतिं। प्रजापतिः सं॥

प्र· सविताभूत्वा। इत्येतानिपदानिकुमारंवाचयेत्॥अथवा।युंजानेसवितेतिद्वयंवावाचयेत्॥ ॥
तथाअंतरंदीक्षांव्याख्यास्यामः।इत्यापस्तंबसूत्रेचोक्तं॥तथैनंसर्वेषामनुवाकानांप्रभृति
·१ व्याहरयति।प्रथमयाचर्चेति॥ततोजयादीस्तथाराष्ट्रभृतःकृत्वाउष्णोदकमुपस्पृश्य।शंनोवातः
पवतामित्यनुवाकेनशांतिंकुर्यात्॥ततोब्रह्मचारीचक्षुषीसंमील्यामौनीभूत्वाआरात्रेस्तनंचकृत्वा
सूर्यास्तमयगृहमागत्य अंध इव तिष्ठन्नासीनोवाग्यतःस्तदानीं।श्वोवाअभ्युदयेकृत्वातद्वासो
ब्रह्मणेदद्यात्॥इतिसौम्यव्रतं॥अथसौम्यव्रतोत्सर्जनं॥ततःसंवत्सरेपूर्णेतदानींवाआचा
र्यःप्राणानायम्यइमंकुमारंसौम्यव्रतोत्सर्जनेनसंस्करिष्यइतिसंकल्प्यस्नानसंध्यंचनेदा
मादिपूर्ववत्कृत्वाव्युत्क्रमेण।द्यौःसमित।अंतरिक्षंसमित।पृथिवीसमित।प्राजापत्या

मेखमिदंसिसपत्नक्षयिणी। इतिचनस्त्रः समिधआधाय। आदित्यव्रतपतेकांउऋषिभ्यः सौम्यव्रतमचारि
षं। तद्द्शकंतन्मेराधि। वायोव्रतपतेकांउऋषिभ्यः सौम्य·षं। तद्द्शकं॰ अग्नेव्रतपतेकां·सौ·तद्व्रता
नांव्रतपते·कां·सौ·इत। इत्युत्थानविशेषः। अत्र तु·युंजतइत्यादिसंमीलनादिवर्जयेत्। ततअभ्युदयि
कंकृत्वाब्रह्मणेवरंदद्यात्॥ ॥इतिसौम्यव्रतोत्सर्जनं॥ अथाग्नेयव्रतमुच्यते। तत्राचार्योब्रह्मचारि
वपनंकारयित्वास्नानानंतरंप्राणानायम्यमंकुमारमाग्नेयव्रतपतेनसंस्कुरिष्यइतिसंकल्प्य·अग्निं
कांउऋषिं·सांहितीर्देवताउपनिषदः। याज्ञिकीर्देवताउपनिषदः। वारुणीर्देवतारूप·ब्रह्माणंस्व
यंभुवं। सदसस्पतिंचावाह्यगंधपुष्पादिभिरभ्यर्च्य। ब्रह्मचारिणानिवीतिनातर्पणंकारयित्वाअ
ग्निप्रतिष्ठापनाद्यग्निमुखांतेप्रधानहोमंकुर्यात्। ॐ अग्नयेकांउऋषयेस्वाहा। अग्नये॰।२॥

५· अग्नेनयसुपथाराये अस्मान्विश्वानिदेववयुनानिविद्वान्।युयोध्यस्मज्जुहुराणमेनोभूयिष्ठान्तेनम
उक्तिंविधेमस्वाहा॥अग्नये॰२॥प्रवःशुक्रायभानवेभरध्वं।हव्यंमतिंचाग्नयेसुपूतं।योदैव्यानि
९२ मानुषाजनूंषिअंतर्विश्वानिविद्मनाजिगातिस्वाहा।अग्नये॰३॥अच्छागिरोमतयोदेवयंतीः।अग्निंयं
तिद्रविणंभिक्षमाणाः।सुसंदृशंसुप्रतीकंस्वंचंहव्यवाहमरतिंमानुषाणांस्वाहा॥अग्नये॰४॥अग्ने
त्वमस्मद्युयोध्यमीवाअनग्नित्राअभ्यमंतकृष्टीः।पुनरस्मभ्यंसुवितायदेवक्षांविश्वेभिरजरेभिर्य
जत्रस्वाहा।अग्नये॰५॥अग्नेत्वंपारयानव्यो॰इंयास्वाहा।अग्नये॰६॥प्रकारवोमननावच्यमा
नादेवद्रीचींनयथादेवयंतः॥दक्षिणावाड्वाजिनीप्राच्येति॥हविर्भरंत्यग्नयेघृताचीस्वाहा॥अग्नये॰
७॥पुनःप्र॰वंचन॰सौदुंतीभ्यो॰८ याजिकीभ्यो॰९॥वारुणीभ्यो॰१०॥ब्रह्मणस्वयंभुवे।११।सदसस्प

तये· १२॥ सदसस्पतिमद्भुतं· १३॥ इतिजुहुयात्ततोब्रह्मचारी॥ अग्नेव्रतपतेकांडर्षिभ्यः अग्नेव्र
तंचरिष्यामितच्छकेयंतन्मेराध्यतां॥ वायोव्रतप·कां·भ्यः॰ अग्ने॰ आदित्यव्रतपते॰ व्रतानांव्रत
पते।५॥ इत्यग्निमुपतिष्ठते॥ आचार्योग्नयादित्येभ्यस्तत्पूर्वंतत्ब्रह्मविसर्जनांतेनांदीमुखंकुर्यात॥
इत्याग्नेयव्रतं॥ अथाग्नेयव्रतोत्सर्जनं॥ ततःसंवत्सरेपूर्णेतदानीवाप्राणानायम्य मंकुमारमाग्नेः
यव्रतोत्सर्जनेनसंस्करिष्यतिसंकल्प्यचर्चनादिसर्वपूर्ववत्। उपस्थानेविशेषः। अग्नेव्रतपतेकां
डर्षिभ्य·आग्नेयव्रतमचारिषं। तदशकंतन्मेराधि। वायोव्रतपते· कां·आग्ने·त·धि॥ आदित्य
व्रतपतेकां· आग्ने·। व्रतानांव्रतप·कां·। इतिविशेषः। ततःअभ्युदयिकंकुर्यात॥ ॥इत्याग्नेय
व्रतोत्सर्जनं॥ अथवैश्वदेवव्रतं। आचार्योग्ब्रह्मचारिणःकेशादीन्वापयित्वाप्राणानायम्यं

प्र· मंकुमारंवैश्वदेवग्रनेनसंस्कारिष्यामीतिसंकल्प्य·विश्वान्देवान्कांडऋषीम्·सांहितीर्देवताउपनिषदः।याज्ञि
कीर्देवताउपनिषदः।वारुणीर्देवताउपनिषदः।ब्रह्माणंस्वयंभुवंसदसस्पतिंचायाम्यानिवीतिनाक्षोद
५.३. कोपचारैःरभ्यर्च्यतर्पणादिकारयित्वा·अग्निप्रतिष्ठापनाद्यग्निमुखांते·विश्वेभ्योदेवेभ्यःकांडऋषि
भ्यःस्वाहा।तेभ्यः१॥आनोविश्वेअस्क्रागमंतुदेवाः।मित्रोअर्यमावरुणःसजोषाः।भुवन्यथानोवि
श्वेवृधासःकरंत्सुषाहाविथुरंनशवःस्वाहा।विश्वेभ्योदेवेभ्यः२॥शंनोदेवाविश्वदेवाभवंतु।शंस
रस्वतीसहधीभिरस्तु॥शमभिषाचःशमुरातिषाचः।शंनोदिव्याःपार्थिवाःशंनोअप्याः।स्वाहा॥ ?.५
विश्वेभ्यो३॥येसवितुःसत्यसवस्यविश्वे॥मित्रस्यव्रतेवरुणस्यदेवाः।तेसौभगंवीरवद्गोमदप्नः।द
धातनद्रविणंचित्रमस्मे॥स्वाहा।विश्वेभ्यो०४॥अग्नेयाहिदूत्यंवारिषण्यः।देवाँअच्छाब्रह्मकृता

गणेन॥ सरस्वतीमरुतोअश्विनायः। यश्चिदेवान्‌रत्नधेयायविश्वानस्वाहा॥ विश्वेभ्यो॰ ५॥ द्यौःपितः
पृथिवीमातरध्रुक्‌॥ अग्नेभ्रातर्वसवोमृतानः। विश्वआदित्याअदितेसजोषाः। अस्मभ्यंशर्मबहुलं
वियंत। स्वाहा। विश्वेभ्यो॰ ६॥ विश्वेदेवाःशृणुतेमंहवंमेयेअंत॰ यज्ञध्वंस्वाहा। विश्वेभ्यो॰ ७॥ सांहि
ताभ्यो॰ ८॥ याज्ञिकीभ्यो॰ ९॥ वारुणीभ्यो॰ १०॥ ब्रह्मणेस्वयंभुवे॰ ११॥ सदसस्पतये॰ १२॥ सदसस्पति
मद्भुतंइतिहुत्वा॥ १३॥ ततोब्रह्मचारी। अग्नेव्रतपतेकांडऋषिभ्योवैश्वदेवव्रतंचरिष्यामितच्छकेयंतः
मेराध्यतां। एवं। वायोव्रतपतेकां॰ आदित्यव्रतपतेकां॰ व्रतानांव्रतपतेकां॰ वै॰ त॰ इत्युपतिष्ठेत॥ त
तः आचार्योजयादिप्रस्तराप्रभृतब्रह्मोत्सर्जनांतेनाद्भिश्राद्धंकुर्यात्‌। इतिवैश्वदेवव्रतं। ततःसंव
त्सरेपूर्णे॰ तदानींवा। वैश्वदेवव्रतोत्सर्जनंकुर्यात्‌। प्राणानायम्य इमंकुमारं वैश्वदेवव्रतोत्सर्जनेनसं

प्र· स्करिष्य इति संकल्प्य। गणपत्यर्चनादि सर्वं पूर्ववत्कुर्यात्॥ होमं च कुर्यात्॥ उपस्थाने विशेषः। अग्ने व्रतपते
काण्डऋषिभ्यो वैश्वदेवव्रतमचारिषं तदशकं तन्मेराधि। वायो व्रतपते का· वै· धि॥ आदित्य व्रतपते
९४ का· व्रतानां व्रतपते का· वै· पं· तदरा राधीति विशेषः॥ ॥इति वैश्वदेवव्रतोत्सर्जनं॥ ॥इति प्रत्येकं व्रतचतुष्ट
यं॥ अथ प्राजापत्यसौम्याग्नेयवैश्वदेवव्रतानि सूक्तजपहोमोपस्थानरहितानि वा कुर्यात्। एकतंत्रेण
वा कुर्यात्। तथा। श्रावण्यां प्रोष्ठपद्यां वा वैशाख्यामपि वा द्विजः॥ एकतंत्रेण वा कुर्यादेतद्व्रतचतुष्टय
मिति॥ तत्र प्रयोगः॥ आचार्यः प्राणानायम्य मं कुमारममुकशर्माणं प्राजापत्यसौम्याग्नेयवैश्व
देवव्रतैः संस्करिष्य इति संकल्प्य· प्रजापतिं काण्डऋषिं सोमं काण्डऋषिं अग्निं काण्डऋषिं विश्वान्देवान् २
काण्डऋषीन् सांहितीर्देवता उपनिषदो याज्ञिकीर्देवता उपनिषदो वारुणीर्देवता उपनिषदो ब्रह्माणं

स्वयंभुवं सदस्यांतं चाचाद्यामीति प्रत्येकमावाह्य पूर्ववत् षोडशोपचारैरभ्यर्च्य अग्निप्रतिष्ठापना
द्यग्निमुखांतं पूर्ववत् यथाक्रमेण होमोपस्थापनानि कृत्वा सौम्यव्रतोक्त पृथिवी समिदिति समिधानं कृ
त्वा सर्वं व्रतहोमांतं जयादिहोमं च समुद्दिश्य विधाय अभ्युदयिकं च सदद्वं कुर्यात ॥ तथा। गणेशः स्वय
माणानां तं च वन मातृकापूजनं नांदीमुखं भवेद्देवं होमस्तु स्यात्पृथक्पृथक् ॥ व्रतेषु शांतिहोमेषु विप्र
श्वोरपोत्सवे ॥ नरोम प्रधानकं चैव शम्याप्य न संशयः ॥ ॥ इति श्रौत प्रकाशे व्रतचतुष्टयं ॥ अथ गो
दानव्रतं ॥ एवं गोदानं षोडशे वर्षे पूर्वेद्युः पुण्याहवाचनं नांदीश्राद्धवाचनं नांदीमुखसंकल्पांतं कृत्वा परेद्युः
कर्मणः पुण्याहवाचनं नांदीमुखब्राह्मणभोजनं च विधाय प्राणानायम्य मम अमुकशर्माणं गोदानव्रते
न संस्करिष्ये इति संकल्प्य अग्निप्रतिष्ठापनादि प्रधानयागांते मानुषपात्राणि नीता स्नोदकं शु

ऽपवगालकादर्भपिंजूलशलाकुलप्रादीनि सरूत्पयुज्याज्यभागांते। धातादशाविंशतिश्च तस्तभिः यस्त्वा
हृदाकीरिणेति चतसृभिरित्यप्रायश्चित्याद्याहुतीर्हुत्वा समिल्लंनहनेहुत्वा जयादीश्च पश्चानं राष्ट्रभृतः हुत्वा उ
१५ हमनयाप्यवुदकेनेत्यादि शिखानिधानं यजमं सर्वं। चौलवत्कृत्वा केशनिधानान्तं समानं। शिखावर्जं सर्वान्के
शान्वापयित्वा स्नात्वाचम्य नूतन वस्त्रं धृत्वा पूर्णपात्रमुद्धृत्य ब्रह्मणे वरं दत्वा ब्राह्मणैः सह भुंजीया
त॥ ॥इति गोदानव्रतं॥ अथ समावर्तनं॥ आचार्यो ब्रह्मचारिणा पुण्याहं वाचयित्वा ब्रह्मचारी माण
नायेत्याद्येत्यादि तीर्थश्रवणांते वेदमधीत्य स्नातकव्रतं करिष्य इति संकल्प्य प्रातिसरं बध्वा अभ्युदयिकं
संकल्प्य आगृदयाद्गृहं प्रविश्य तत्रोन्नाचर्मणा द्वारमपिधाय हलेन नमेतदहूर्यादित्याभितयेन्नमध्यंदि
नेः ग्नीधनादि षट्पात्रप्रयोगांते तदुत्तरतः पाकान्नामिनिसत्रेचस्त्रमुवर्णमणिगुंवादरमणिंच

स्रुवस्रुगं धंनवतौ न्हीतोध्मां बुध्मार कश्यवत्सवर्णवर्द्दं शांजनदर्पणापानदूर्वकुशा आनडुहसार्द्रस्नान
चूर्णौदुंबरशाखेरालकौदर्भपिंजूलौदुंबरकाण्डानिप्रयुंज्यान्सर्वत्रमानुषपात्राणिसर्वत्र आज्यभागां
ते · ॐ इमंस्तोममर्हते जातवेदसे रथमिव संमहेमामनीषया॥ भद्राहिनः प्रमतिरस्य संसद्यग्ने सख्ये
मारिषामावयंतवस्वाहा॥ अग्नये जातवेदसे इदं॥ इति पालाशीं समिधमाधायापरेणाग्निं कुट
उपविश्य · त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं॥ यद्देवानां त्र्यायुषं॥ तन्मे अस्तु त्र्यायुषं। इति क्षु
रमभिमंत्र्य · शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा मा हिंसीः। इति वपनप्रदाय उष्णेन वाय
विन्त्यपाः संसर्जनाद्याः केशान्धाना ब्रीहियवसमानं जघनार्धे त्रयः स्थापयित्वा यस्य मे स्वलां ब्रह्म
चारिणे प्रयच्छति ताः स · उद्गमदनं मृष्या यनास्य पाप्मानमपगृह्णाम्युत्तरतो ह्युपस्थः। अस्मिन्मंत्रेत्रे